तेन विद्राव्यमाणास्ते पाण्डवाः सर्वतोदिशम् ।
त्रातारं नाभ्यविन्दन्त स्वेष्वनीकेषु भारत ॥ २८
भैमसेनिं रथस्थं तु तत्रापश्याम भारत ।
शेषा विमनसो भूत्वा प्राद्रवन्त महारथाः ॥ २९
निवृत्तेषु तु पाण्डूनां पुनः सैन्येषु भारत ।
आसीन्निष्टानको घोरस्तव सैन्येषु संयुगे ॥ ३०
घटोत्कचस्ततो राजन्भगदत्तं महारणे ।
शरैः प्रच्छादयामास मेरुं गिरिमिवाम्बुदः ॥ ३१
निहत्य ताञ्शरान्राजा राक्षसस्य धनुश्च्युतान् ।
भैमसेनिं रणे तूर्णं सर्वमर्मस्वताडयत् ॥ ३२
स ताड्यमानो बहुभिः शरैः संनतपर्वभिः ।
न विव्यथे राक्षसेन्द्रो भिद्यमान इवाचलः ॥ ३३
तस्य प्राग्ज्योतिषः क्रुद्धस्तोमरान्स चतुर्दश ।
प्रेषयामास समरे तांश्च चिच्छेद राक्षसः ॥ ३४

— ^{c}) K5 तथा (for यथा). G2 वज्ररथः (for °धरः). M4 राजन् (for पूर्वं).

26 T2 reads 26 after 33^{ab}; G2 after 35. B1 G1. 3 om. 26^{ab}. G1. 3 read 26^{cd} after 34^{ab}. — ^{c}) Da1 विशेषान्. K0 नैव (for न स्म). K2 विशेषं नैव विदुर् (submetric); D1 S विशेषं तत्र न विदुर् (T2 विविशुर्). — ^{d}) K3 Da D5-8 हैडंबभगदत्तयोः; D1 भगदत्तहिडंबयोः.

27 ^{a}) Da1 सुरंतपः (for सुरपतिः). Ś1 K0-2. 4 M4 क्रुद्धस् (fro शक्रस्). —^{b}) Da Dn1 D5 तापयामास (for त्रासया°). B1 om. (hapl.) from दानवान् up to यामास in 27^{d}. — ^{c}) T1 G1. 2. 4 M तथा स; T3 तत्तथा; G3 यथा स (for तथैव). K2. 4 B2-4 D (except D2. 3) राजा (for राजंस्). — ^{d}) K1. 2. 4. 5 D (except D1) द्रावयामास (for त्रास°).

28 ^{a}) Ś1 Da Dn D8 विद्राव्य(D8 °व)मानास्ते; K5 व्यद्राव्यमाणास्ते; M4 वित्रास्यमानास्ते. — ^{c}) D8 M4 भ्रातरं (for त्रातारं). Ś1 K1 नाध्यगच्छंतः; K0. 2. 3 D3 नाध्यगच्छंत; K4 नाध्यविंदंत; K5 D2. 8 नाभ्यगच्छंत (D8 °तः); B1. 2. 4 नाभ्यविंदंतः; B3 वाभ्यविंदंत; Dn1 नाभ्यविंदंति; Dn2 नाभ्यविंदत; T1 G4 नाभिविंदंति; T2 नाभ्यविंदते; G2 नाभिविंदंत. — ^{d}) D1 निरयस्था यथा नराः.

29 D5 M1 om. (hapl.) 29^{a}-30^{b}; B4 M3 om. (hapl.) 29^{ab}. — ^{a}) K2 भैमसेनि; K5 भीमसेनं. K3. 5 च (for तु). K4 Da2 Dn1 भैमसेनिरथस्तूर्णं (K4 °थं तुर्णं); T2 भैमसेनिरथस्थस्तु. — ^{b}) K3. 5 D3 T G M2 तत्र पश्याम (for तत्रापश्याम). — ^{d}) K2 महारथः.

30 D5 M1 om. 30^{ab} (cf. v. l. 29). — ^{a}) K0-4 D1. 2 च (for तु). S विनिवृत्तेषु पांडूनां. — ^{b}) K0. 1 पुरा (for पुनः). D3 सैन्यं तु. — After 30^{ab}, D1 ins.:

324* नैष्ठिकीं बुद्धिमास्थाय स्वर्गाय भरतोत्तमाः ।

— ^{c}) D2 विनाशको; T2 नादो महान्; Cr निस्वानको; Co. d निष्टानको (as in text). — ^{d}) K0. 4 सैन्यस्य (for सैन्येषु).

31 ^{a}) D3 M1-3. 5 तदा (for ततो). — ^{b}) Ś K0-2. 4 महाहवे (for °रणे). — ^{c}) K4 शनैः; D2 शब्दैः (for शरैः). — ^{d}) D8 मेघैर् (marg. sec. m. पानीयैः, perhaps a gloss) (for मेरुं).

32 ^{a}) K0. 1. 4 निपात्य ताञ्; K2 निपातातां (sic); D2 निहन्य ताञ्. K3. 5 D2 घोरान्; Da Dn1 D4 S राजन् (for राजा). D1 निहत्य तान्शरव्रातान्. — ^{b}) K3 Da D6 राक्षसश्च (for °सस्य). — ^{c}) Da Dn1 D हंतुं (for तूर्णं). — ^{d}) K3 सर्वंवर्मस्व°; S भूर्ध्नि मर्मस्व°.

33 After 33^{ab}, T2 reads 26, om. 33^{c}-35^{d}. — ^{d}) G1-3 छिद्यमान (for भिद्य°).

34 T2 om. 34 (cf. v. l. 33). — ^{a}) Ś1 K0-2 Dn2 D1 ततः (for तस्य). M1-3. 5 प्राग्ज्योतिषस्तत्र क्रुद्धस्. — ^{b}) K5 B1. 3. 4 D2 च; B2 Da Dn D1. 3. 5 S वै (for स). — After 34^{ab}, G1. 3 read 26^{cd}, om. 34^{c}-35^{d}. — ^{d}) D1 G2 तांश्चिच्छेद स राक्षसः.

स तांश्छित्त्वा महाबाहुस्तोमरान्निशितैः शरैः ।
भगदत्तं च विव्याध सप्तत्या कङ्कपत्रिभिः ॥ ३५
ततः प्राग्ज्योतिषो राजन्प्रहसन्निव भारत ।
तस्याश्वांश्चतुरः संख्ये पातयामास सायकैः ॥ ३६
स हताश्वे रथे तिष्ठन्राक्षसेन्द्रः प्रतापवान् ।
शक्तिं चिक्षेप वेगेन प्राग्ज्योतिषगजं प्रति ॥ ३७
तामापतन्तीं सहसा हेमदण्डां सुवेगिताम् ।
त्रिधा चिच्छेद नृपतिः सा व्यकीर्यत मेदिनीम् ॥ ३८
शक्तिं विनिहतां दृष्ट्वा हैडिम्बः प्राद्रवद्भयात् ।
यथेन्द्रस्य रणात्पूर्वं नमुचिर्दैत्यसत्तमः ॥ ३९
तं विजित्य रणे शूरं विक्रान्तं ख्यातपौरुषम् ।
अजेयं समरे राजन्यमेन वरुणेन च ॥ ४०
पाण्डवीं समरे सेनां संममर्द सकुञ्जरः ।
यथा वनगजो राजन्मृद्नंश्चरति पद्मिनीम् ॥ ४१
मद्रेश्वरस्तु समरे यमाभ्यां सह संगतः ।
स्वस्रीयौ छादयांचक्रे शरौघैः पाण्डुनन्दनौ ॥ ४२
सहदेवस्तु समरे मातुलं वीक्ष्य संगतम् ।
अवारयच्छरौघेण मेघो यद्वद्दिवाकरम् ॥ ४३

C. 6. 3662
B. 6. 83. 44
K. 6. 83. 44

35 T2 G1.3 om. 35 (cf. v. l. 33, 34). — a) D6 भित्त्वा (for छित्त्वा). Ś1 सतासतांश्शितान्महाबाहुः (sic); Ko.2 तांश्छित्त्वा स महाबाहुस्. — c) M1.3.5 भगदत्तस्य (for °त्तं च). D8 प्र-; G2 M4 तु (for च). — d) Ko-2 वज्रसंनिभैः; D2 कंकपत्रिणां. — After 35, G2 reads 26.

36 a) K4 प्राग्ज्योतिषा; D2.3 प्राग्योतिषो. K3.5 B D (except D1) T1 G राजा (for राजन्). — b) = 6. 24. 10b. — c) B2-4 Dn2 D3.4.7.8 S राजन्; Da Dn1 D1.5 हत्वा (for संख्ये). — d) Ś1 Ko.2.4 M4 प्रेषयामास (for पात°). Ko-2 मृत्यवे; K4 नृत्यवे; B2.4 शायकैः; B3 संयुगे (for सायकैः).

37 a) K3.4 स हताश्व-; T1 G हताश्वे स (by transp.); M हताश्वे तु. — c) D1 यत्नेन (for वेगेन). — d) Ś1 प्राग्ज्योतिषभयं प्रति; Ko-2 °नृपं प्रति; K3-5 B1 Da Dn1 D1.4 (before corr.).5 T1 G1.2.4 °रथं प्रति; D2.3 प्राग्योतिषरथं प्रति; G3 रक्षसेंद्ररथं प्रति.

38 a) K2 Da1 तामापतंती; G2 तामापतंतं. M (except M4) समरे (for सहसा). — b) K1 हेमदंडं. K5 B3.4 सुवेगिनीं; B1.2 Dn2 D4.8 प्रवेगितां. Da1 हेमदंडास्तु वेगितां; D1 हिडंबेनाशु वेगितां. — c) K3.5 D2 G द्विधा; T2 त्रेधा (for त्रिधा). G3 समरे (for नृपतिः). — d) Ś1 K (except K3.5) Da2 Dn1 D4.8 त्वकीर्यंत; D1 त्वशीर्यंत; T1 G2.4 विकीर्यंत; T2 व्यकीर्यंत; G1.3 [अ]वतीर्यंत; M (except M4) व्यशीर्यंत. Cc cites अकीर्यंत. Ś1 मेदिनी; K1.2 D1 भूतले; B2 वै भुवि (for मेदिनीम्).

39 a) Ś1 K1 विनिहितां. — b) K1-3.5 हैडंबिः; Da D1.5-7 हैडंबः; D2 हैडंब्यः; M4 हैडिंबं. K4 रणात् (for भयात्). — c) Dn2 यथेंद्रेण. Da Dn D4.5.7.8 रणे; D1.6 T2 G1-3 M भयात् (for रणात्). K4 D1 तूर्णं (for पूर्वं). K3.5 D2 रणाद्यथा वज्रधरान् (K5 °धरो). — K2 om. 39d–41a. — d) K4 दानवोत्तमः; G3 दैत्यसंमतः (for दैत्यसत्तमः). K5 D2 पूर्वं नमुचिर्दानवः.

40 K2 om. 40 (cf. v. l. 39). — a) D2 विनिर्जित्य; M5 विजित्य तु (for तं विजित्य). D (except D1.2.6) S शत्रुं (for शूरं). — b) K3 Da1 विक्रांत-; K4 B2 T2 विख्यातं; T1 G विख्यातः (G2 °त-). — c) Da1 D5 अजियं; D2.3 (by corr.) अजयं; T1 G अजय्यं (G1.3 °य्यः); M4 अजेयः. Da1 समरं. K3.4 B1.3.4 D6 वीरं; K5 D2 शूरं (for राजन्). — d) Ś1 Ko.1 वा (for च).

41 K2 om. 41a (cf. v. l. 39). — a) Da1 पांडवं. K4 राजन् (for सेनां). — b) Ko Da1 D2.3 G2.3 स समर्द; K2 ममर्द (submetric); D1 स ममंथ. D1 [अ]थ (for स-). T1 G4 सकुंजरां. D6 संमर्दयत सकुंजरः. — c) K5 वनं गजो; D1 वनगतो; D8 °गजा. G2 राजा (for राजन्). — d) K3 D2 गृह्णंश; T2 मत्तं (for मृद्नंश्). K2 Da1 पद्मिनी; D8 मेदिनीं.

42 a) K4 D (except D1-3.6) मद्रेश्वरश्च; T2 °रस्य. — D6 om. 42bcd. — b) K3 D2 समसज्जत; D5 सह संव्रत (for सह संगतः). — c) Ko.1 स्वस्रेयौ; K2 स्वश्रेयौ; Da1 स्वस्रीयौ; M2 स्वास्रियौ. K5 छंदयांचक्रे. — d) S सायकैः (for शरौघैः).

43 a) K4 माद्रेयश्चापि; K5 Da Dn1 D5 सहदेवश्च (K5 °स्य). — b) K3 B Dn2 D3.4.6-8 दृश्य K5 D2 S प्रेक्ष्य; D1 स ह (for वीक्ष्य). K4.5 D2

C. 6. 3683
B. 6. 83. 45
K. 6. 83. 45

छाद्यमानः शरौघेण हृष्टरूपतरोऽभवत् ।
तयोश्चाप्यभवत्प्रीतिरतुला मातृकारणात् ॥ ४४
ततः प्रहस्य समरे नकुलस्य महारथः ।
अश्वान्वै चतुरो राजंश्चतुर्भिः सायकोत्तमैः ।
प्रेषयामास समरे यमस्य सदनं प्रति ॥ ४५
हताश्वात्तु रथात्तूर्णमवप्लुत्य महारथः ।
आरुरोह ततो यानं भ्रातुरेव यशस्विनः ॥ ४६
एकस्थौ तु रणे शूरौ दृढे विक्षिप्य कार्मुके ।
मद्रराजरथं क्रुद्धौ छादयामासतुः क्षणात् ॥ ४७
स च्छाद्यमानो बहुभिः शरैः संनतपर्वभिः ।
स्वस्रीयाभ्यां नरव्याघ्रो नाकम्पत यथाचलः ।
प्रहसन्निव तां चापि शरवृष्टिं जघान ह ॥ ४८
सहदेवस्ततः क्रुद्धः शरमुद्यम्य वीर्यवान् ।
मद्रराजमभिप्रेक्ष्य प्रेषयामास भारत ॥ ४९
स शरः प्रेषितस्तेन गरुत्मानिव वेगवान् ।
मद्रराजं विनिर्भिद्य निपपात महीतले ॥ ५०
स गाढविद्धो व्यथितो रथोपस्थे महारथः ।
निषसाद महाराज कश्मलं च जगाम ह ॥ ५१

T_2 संयुगे (for संगतम्). — ^{c}) D_1 G_3 अवाकिरच्; G_1 अवारयन्. Ś$_1$ K_{0-2} D_3 छरौघेन. — Ś$_1$ om. (hapl.) 43^d–44^a. — ^{d}) D_2 मेघा इव (for मेघो यद्वद्).

44 Ś$_1$ om. 44^a (cf. v. l. 43). — ^{a}) D_3 S सं- (T_1 G_4 स)छाद्यमानस्तु शरैः. — ^{b}) T_2 $G_{1.3}$ M हृष्टरूपधरोभवत् (M_2 °रोब्रवीत्). — ^{c}) K_6 D_2 चान्या ; $D_{1.3.6}$ S चास्य (for चापि). — ^{d}) D_1 माद्रिकारणात्; M (except M_4) भ्रातृ°. Ś$_1$ अतुलामर्षकर्षणात्.

45 ^{a}) G_{1-3} प्रसह्य (for प्रहस्य). — ^{b}) $K_{3.5}$ B_4 D_6 महात्मनः; D_5 महारथं. D_2 (before corr.) सहदेव-महात्मनः. — After 45^{ab}, S ins. :

325* ध्वजं चिच्छेद बाणेन धनुश्चैकेन मारिष ।
अथैनं छिन्नधन्वानं छादयन्निव भारत ।
निजघान रणे तं तु सूतं चास्य न्यपातयत् ।

[(L. 2) T_1 $G_{2.4}$ छादयामास ; T_2 मानयन्निव (for छादयन्निव).]

— After 325* G_2 *repeats* 45^{ab}. — ^{c}) Ś$_1$ अश्वान्वा ; $K_{3.5}$ Da Dn_1 $D_{2.5.6}$ T_2 M अश्वांश्च ; T_1 G हयांश्च. G_2 समरे (for चतुरो). — ^{d}) K_4 B_4 शायकोत्तमैः. — ^{e}) B_1 D (except $D_{1.2}$) S मद्रेशो (T_2 माद्रेयो) (for समरे).

46 Ś$_1$ K_{0-2} om. 46^{ab}. — ^{a}) K_5 हताश्वात्तद्- (for °श्वात्तु). K_{3-5} D_{1-3} राजन् (for तूर्णम्). — ^{b}) Da_1 महारथाः ; D_5 °रथं. — ^{d}) T_1 G नराधिपः ($G_{1.2}$ °प) (for यशस्विनः).

47 ^{a}) T_2 एकयानौ (for एकस्थौ तु). D_1 तौ (for तु). D_6 रथे वीरौ ; T_1 G ततः क्रुद्धौ ; T_2 M ततः शूरौ (for रणे शूरौ). — ^{b}) S दृढविक्षिप्तकार्मुकौ. — ^{c}) G_2 °रथात्. $K_{3.5}$ $B_{1.3.4}$ D_{1-3} S तूर्णं (for क्रुद्धौ). — ^{d}) D_6 पातया° (for छादया°). S रुषा (T_2 °षात्) (for क्षणात्).

48 ^{a}) K_{0-3} D_3 S (except G_1) सं- (for स). $K_{3.5}$ D_2 नृपतिः ; Da_2 D_5 समरे (for बहुभिः). — ^{c}) $K_{0.2}$ स्वस्रे° ; D_3 G_2 M_5 स्वस्ति° (for स्वस्री°). $K_{2.3}$ M_4 °व्याघ्रौ ; D_1 °व्याघ्र. — ^{d}) $D_{1.3}$ T_1 महाबलः (for यथाचलः). — ^{f}) Ś$_1$ K_4 B_{2-4} $D_{3.6}$ शस्त्र° (for शर°). K_3 जगाम (for जघान). $B_{2.3}$ सः (for ह). — For 48^{cd}, S subst. :

326* पृषत्कानां सहस्राणि प्रहसन्निव तावपि ।
सृजन्रुरोध समरे मेघो वृष्ट्या यथाचलम् ।

[(L. 1) T_1 G_4 M_3 पृषत्काणां ; G_{1-3} M_5 प्रपद्भकाणां. T_2 स हसन्निव. — (L. 2) T_1 $G_{1.4}$ $M_{1.3}$ यथाचलौ. M_4 मेघा वृष्ट्या यथाचलं.]

49 ^{b}) K_4 B D_6 उद्गृह्य ; K_6 Da_2 $D_{2.5}$ °द्धृत्य ; Da_1 Dn_1 °द्धृत्य ; S (except M_4) °त्क्षिप्य (for °द्यम्य). M_4 वेगवान् (for वीर्यवान्). — K_5 om. (hapl.) 49^c–50^b. — ^{c}) Ś$_1$ $K_{0-2.4}$ D_1 अभिद्रुत्य (for °प्रेक्ष्य). — ^{d}) T_2 संयुगे (for भारत).

50 K_5 om. 50^{ab} (cf. v. l. 49). — ^{b}) B $D_{1.5}$ S गरुडानिल- ; Da D_5 मरुत्वानिव (for गरुत्मानिव). K_4 पन्वगः (sic) (for वेगवान्). — ^{d}) Da_2 निष्पपात.

51 ^{b}) K_0 रथोपस्थो. — ^{c}) Da Dn_1 D_5 रथोपस्थे (for महाराज). — ^{d}) K_2 कल्मषं ; D_6 कल्मलं (for कश्मलं).

तं विसंज्ञं निपतितं सूतः संप्रेक्ष्य संयुगे ।
अपोवाह रथेनाजौ यमाभ्यामभिपीडितम् ॥ ५२
दृष्ट्वा मद्रेश्वररथं धार्तराष्ट्राः पराङ्मुखम् ।
सर्वे विमनसो भूत्वा नेदमस्तीत्यचिन्तयन् ॥ ५३
निर्जित्य मातुलं संख्ये माद्रीपुत्रौ महारथौ ।
दध्मतुर्मुदितौ शङ्खौ सिंहनादं विनेदतुः ॥ ५४
अभिदुद्रुवतुर्हृष्टौ तव सैन्यं विशां पते ।
यथा दैत्यचमूं राजन्निन्द्रोपेन्द्राविवामरौ ॥ ५५

इति श्रीमहाभारते भीष्मपर्वणि एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

८०

संजय उवाच ।
ततो युधिष्ठिरो राजा मध्यं प्राप्ते दिवाकरे ।
श्रुतायुषमभिप्रेक्ष्य चोदयामास वाजिनः ॥ १
अभ्यधावत्ततो राजा श्रुतायुषमरिंदमम् ।
विनिघ्नन्सायकैस्तीक्ष्णैर्नवभिर्नतपर्वभिः ॥ २
स संवार्य रणे राजा प्रेषितान्धर्मसूनुना ।
शरान्सप्त महेष्वासः कौन्तेयाय समर्पयत् ॥ ३
ते तस्य कवचं भित्त्वा पपुः शोणितमाहवे ।

C. 6. 3699
B. 6. 84. 4
K. 6. 84. 4

52 ^{a}) T_2 तदसंज्ञं (for तं विसंज्ञं). — ^{b}) K_2 सूत; G_3 सूतं (for सूतः). Da_1 संप्रक्ष (sic); D_1 सपदि (for संप्रेक्ष्य). — ^{c}) $Ś_1$ रथेनाथो; K_1 °नाजो (for °नाजौ). — ^{d}) K_3 T_1 G_{1-3} M_4 अपि पीडितं; $D_{1.4.6-8}$ T_2 अतिपी°; D_3 अनुपीडितः; $M_{1.3}$ अपि पीडितः; M_2 अभिपीडितः.

53 ^{b}) Da_1 Dn_2 धार्तराष्ट्रः. T_1 G_4 पराङ्मुखाः; G_2 °खः. — ^{c}) B_1 सुमनसो. — ^{d}) K_2 D_3 T_2 चिंतयन्; D_8 [अ]चिंतयत्.

54 ^{a}) D_5 मातुषं (for मातुलं). T G_1 M संखे; $G_{2.3}$ संघे (for संख्ये). — ^{b}) K_3 B_2 महाबलौ. — ^{c}) D_1 जग्मतुर् (for दध्मतुर्). Da_1 शंखैः; D_1 संख्ये; T_1 G_4 शंखं (for शङ्खौ). — ^{d}) $K_{0.1}$ $B_{1.3}$ Da_2 Dn_1 $D_{2.3.5.6}$ S च नेदतुः; K_2 च नंदतुः; Da_1 च भेदतुः (for विनेदतुः).

55 ^{a}) $Ś_1$ अभिदुद्रवतुर्; $K_{0.2}$ °दुद्रा°. B_1 Da Dn_1 D_5 T_2 M हृष्टौ (B_1 कृष्णौ) चाद्रवतां क्षिप्रं; $B_{2.3}$ हृष्टौ (B_3 अष्टौ) चाद्रवतां संख्ये; B_4 Dn_2 $D_{4.6-8}$ अभ्यद्रवेतां संहृष्टौ; D_3 हृष्टौ प्राद्रवतां संख्ये; T_1 G हृष्टौ चा(G_{1-3} च)द्रवतां सैन्यं. — ^{b}) T_1 G क्षिप्रं तव (for तव सैन्यं). — ^{c}) K_5 राजा (for राजन्). — ^{d}) K_5 इंद्रावेंद्रौ. $Ś_1$ K_4 [अ]परौ (for [अ]मरौ). T_1 G M इंद्रोपेंद्रावरिंदमौ; T_2 इंद्रो वज्रधरो यथा.

Colophon. — *Sub-parvan :* Omitting sub-parvan name, K_{0-2} mention only सप्तमयुद्धदिवसे; K_4 सप्तमेह्नि; D_6 सप्तमे दिवसे; M_4 सप्तमेह्निके. — *Adhy. name :* K_4 D_6 G_2 $M_{1.3}$ द्वंद्वयुद्धं. — *Adhy. no.* (figures, words or both): K_5 76; Da_2 (*sec. m.*) 41; Dn_2 M_5 81; D_6 T_1 G 78; T_2 $M_{3.4}$ 80; $M_{1.2}$ 79 (as in text). — *Śloka no.:* Dn_1 17; Dn_2 D_5 57.

80

1 M_3 om. the ref. — ^{a}) $M_{2.5}$ राजन् (for राजा). — ^{b}) T_1 G_4 transp. मध्यं and प्राप्ते. K_3 मध्ये. — ^{c}) G_2 अभिप्रेत्य. — ^{d}) K_{3-5} $B_{3.4}$ D_2 प्रेषयामास; D_6 नोदया° (for चोदया°).

2 ^{a}) $B_{2.3}$ सोभ्यधावत्; B_4 अभ्यद्रवत् (for अभ्यधावत्). S ततस्तु त्वरितो राजन् (T_2 राजा). — ^{b}) K_5 $D_{1.3}$ अरिंदमः; Da_1 D_5 °दम. — ^{c}) S निजघ्ने (for विनिघ्नन्). B_4 शायकैस्; Dn_2 D_4 सायकांस् (for सायकैस्).

3 ^{a}) K_5 संनिवार्य (hypermetric); D_2 निवार्य (for संवार्य). D_8 शरान्; S ततो (for रणे). B D (except $D_{2.3.6}$) S राजन् (for राजा). — ^{b}) $B_{1.4}$ Da_2 Dn $D_{4.7.8}$ रोषितो; Da_1 D_5 तोषितो (for

C. 6. 3699
B. 6. 84. 4
K. 6. 84. 4

अस्त्रनिव विचिन्वन्तो देहे तस्य महात्मनः ॥ ४
पाण्डवस्तु भृशं विद्धस्तेन राज्ञा महात्मना ।
रणे वराहकर्णेन राजानं हृदि विव्यधे ॥ ५
अथापरेण भल्लेन केतुं तस्य महात्मनः ।
रथश्रेष्ठो रथात्तूर्णं भूमौ पार्थो न्यपातयत् ॥ ६
केतुं निपतितं दृष्ट्वा श्रुतायुः स तु पार्थिवः ।
पाण्डवं विशिखैस्तीक्ष्णै राजन्विव्याध सप्तभिः ॥ ७
ततः क्रोधात्प्रजज्वाल धर्मपुत्रो युधिष्ठिरः ।
यथा युगान्ते भूतानि धक्ष्यन्निव हुताशनः ॥ ८
क्रुद्धं तु पाण्डवं दृष्ट्वा देवगन्धर्वराक्षसाः ।
प्रविव्यथुर्महाराज व्याकुलं चाप्यभूज्जगत् ॥ ९
सर्वेषां चैव भूतानामिदमासीन्मनोगतम् ।
त्रीँल्लोकानद्य संक्रुद्धो नृपोऽयं धक्ष्यतीति वै ॥ १०
ऋषयश्चैव देवाश्च चक्रुः स्वस्त्ययनं महत् ।
लोकानां नृप शान्त्यर्थं क्रोधिते पाण्डवे तदा ॥ ११
स च क्रोधसमाविष्टः सृक्किणी परिलेलिहन् ।
दधारात्मवपुर्घोरं युगान्तादित्यसंनिभम् ॥ १२
ततः सर्वाणि सैन्यानि तावकानि विशां पते ।

प्रेषितान्). K_{0-2} पांडु° (for धर्म°). — ^{c}) M_2 शतान् (for शरान्). T_1 $G_{2.4}$ शरानाशीविषसमान्. — ^{d}) K_5 D_2 कौंतेयस्य. K_0 समर्दयत्; $K_{3.4}$ B_{2-4} Da Dn_2 D_{3-7} समार्पयत्.

4 ^{a}) $K_{3.5}$ D_2 transp. ते and तस्य. — ^{b}) K_2 ययुः (for वपुः). — ^{c}) $Ś_1$ विचिन्वंत; K_5 D_2 °न्वंति.

5 T_2 M (except M_2) om. (hapl.) 5^{ab}. — ^{a}) $Ś_1$ च (for तु). K_{3-5} $B_{1.3.4}$ $D_{1.2.6}$ क्रुद्धो (for विद्धस्). — ^{b}) K_{3-5} $B_{1.3.4}$ D_6 विद्धस्तेन; D_1 राज्ञा तेन (by transp.); D_2 विद्धदेहो. — ^{d}) $Ś_1$ T G $M_{1.4}$ विव्यथे; $K_{3.5}$ B_4 $D_{1.2.6}$ [अ]विध्यत (for विव्यधे).

6 ^{b}) D_1 अस्य (for तस्य). D_5 महात्मना. B_3 केतुं भूमौ न्यपातयत्. — Dn_2 om. 6^{cd}. — ^{cd}) M (except M_4) transp. तूर्णं and भूमौ. K_2 पार्थौ; T_1 $G_{2.4}$ एव; M_4 राज्ञो (for पार्थो). $Ś_1$ K_5 [ऽ]भ्यपातयत्; K_4 व्यपात°; D_1 ह्यपात° (for न्यपात°). T_2 भूमौ निष्कृष्य पातयत् (for ^{d}).

7 ^{b}) $M_{2.3.5}$ च (for तु). T_2 श्रुतायुः सत्यविक्रमः. — ^{c}) K_3 पांडवैर्. Da Dn $D_{4.5.7}$ S निशितैः (for विशिखैस्). T G बाणै (for तीक्ष्णै). — ^{d}) T_1 G_4 विव्याथ.

8 ^{a}) K_0 ततः; K_2 तेपि; D_6 क्रुद्धात्; T_1 $G_{2.4}$ M_4 कोपात्; $G_{1.3}$ क्षोभात् (for क्रोधात्). D_1 ततः प्रज्वलितो भूत्वा. — ^{b}) $K_{3.4}$ D (except $D_{3.7}$) S धर्मराजो (for °पुत्रो). — ^{c}) D_3 भूतानां. M (except M_4) युगांते सर्वभूतानि. — ^{d}) $K_{2.3}$ B Da Dn_1 $D_{2.5.8}$ धक्ष(Da_1 °क्षा)न्निव. $D_{1.3}$ दिधक्षन्निव (D_3 °क्षुरिव) पावकः.

9 ^{a}) $Ś_1$ तं (for तु). — ^{b}) K_1 °राक्षसः; K_3 °मानवाः; K_5 $D_{1.2}$ S °दानवाः. — ^{c}) K_5 प्रविव्यथे; D_6 प्रविव्यधुर् (for °व्यथुर्). — ^{d}) K_{3-5} D_{1-3} M (except M_4) चाभवज्; Da_1 चाभूज् (submetric) (for चाप्यभूज्).

10 D_1 om. 10^{ab}. — ^{a}) $K_{4.5}$ D_2 एव; $M_{3.5}$ चापि (for चैव). — ^{b}) G_2 मनोगतः. — ^{c}) K_3 त्रीलोकान्; Da_1 $D_{1.5}$ T_1 $M_{2.4}$ त्रिलोकान्; D_1 अपि (for अद्य). — ^{d}) Da_1 D_2 धक्षतीति (for धक्ष्यतीति).

11 ^{a}) T_1 G महर्षयश्च; M_4 ऋषयश्च हि (for ऋषयश्चैव). $K_{3.5}$ D_2 ऋषयो ब्राह्मणाश्चैव. — ^{c}) $Ś_1$ K_{0-3} D_3 भृशमत्यर्थं; T_1 कृपयात्यर्थं (for नृप शान्त्यर्थं). D_3 शांत्यर्थे. — ^{d}) K_{0-2} क्रोशिते (for क्रोधिते). M_4 नृपतौ (for पाण्डवे). $Ś_1$ K_3 T_1 G_4 तथा (for तदा).

12 ^{a}) K_5 D_1 स तु; S ततः (for स च). — ^{b}) $Ś_1$ $D_{1.5.6}$ T_2 सृक्किणी; K_3 D_2 सृकिर्णी; K_5 सृक्किणीं; B_1 m सृक्कणी; D_3 G_3 $M_{1-3.5}$ Cc सृक्कणी; M_4 स्रक्कणी. $Ś_1$ लेलिहन्मुहुः; K_{3-5} Da_2 Dn $D_{1.4-8}$ T_2 परिसंलिहन्; Da_1 °संलिहन्; D_2 अथ संलिहन्. K_{0-2} लेलिहन्सृक्कि(K_1 °क्कि)णी मुहुः. — K_5 om. from 12^{cd} up to 6. 81. 14^{cd}. — ^{c}) K_3 बभारात्मवपुर्घोरं; D_2 बलादात्मवपुर्घोरं. — ^{d}) D_1 S युगांताग्निसमप्रभं; D_3 °दित्यसंभवं.

13 K_5 om. 13 (cf. v. l. 12). — ^{a}) K_3 B_1

निराशान्यभवंस्तत्र जीवितं प्रति भारत ॥ १३
स तु धैर्येण तं कोपं संनिवार्य महायशाः ।
श्रुतायुषः प्रचिच्छेद मुष्टिदेशे महद्धनुः ॥ १४
अथैनं छिन्नधन्वानं नाराचेन स्तनान्तरे ।
निर्बिभेद रणे राजा सर्वसैन्यस्य पश्यतः ॥ १५
सत्वरं चरणे राजंस्तस्य वाहान्महात्मनः ।
निजघान शरैः क्षिप्रं सूतं च सुमहाबलः ॥ १६
हताश्वं तु रथं त्यक्त्वा दृष्ट्वा राज्ञस्तु पौरुषम् ।
विप्रदुद्राव वेगेन श्रुतायुः समरे तदा ॥ १७
तस्मिञ्जिते महेष्वासे धर्मपुत्रेण संयुगे ।
दुर्योधनबलं राजन्सर्वमासीत्पराङ्मुखम् ॥ १८
एतत्कृत्वा महाराज धर्मपुत्रो युधिष्ठिरः ।
व्यात्ताननो यथा कालस्तव सैन्यं जघान ह ॥ १९
चेकितानस्तु वार्ष्णेयो गौतमं रथिनां वरम् ।
प्रेक्षतां सर्वसैन्यानां छादयामास सायकैः ॥ २०
संनिवार्य शरांस्तांस्तु कृपः शारद्वतो युधि ।
चेकितानं रणे यत्तं राजन्विव्याध पत्रिभिः ॥ २१
अथापरेण भल्लेन धनुश्चिच्छेद मारिष ।
सारथिं चास्य समरे क्षिप्रहस्तो न्यपातयत् ।
हयांश्चास्यावधीद्राजन्नुभौ च पार्ष्णिसारथी ॥ २२ C. 6. 3718 B. 6. 84. 23 K. 6. 84. 23

सैन्यानि सर्वाणि (by transp.). D_1 ततः सा विव्यथे सेना. —[b]) $Ś_1$ K_{0-2} D_1 तावकानां. —[c]) D_1 G_3 निराशा ह्यभवंस्त(D_1 °वत्त)त्र; T_2 निराशान्यवशस्तत्र.

14 K_5 om. 14 (cf. v. l. 12). —[a]) K_3 सत्व (for स तु). M (except M_4) क्रोधं (for कोपं). —[b]) K_2 शंनिवार्य; D_1 संनियम्य; D_2 संनिर्वार्य. $Ś_1$ महायशः; B Da Dn $D_{1.5.7.8}$ विशां पते; T_1 G महातपाः (for °यशाः). —[d]) K_3 D_2 मध्य° (for मुष्टि°). $K_{3.4}$ B_{1-3} महाधनुः.

15 K_5 om. 15 (cf. v. l. 12). —[a]) D_1 तथैव (for अथैनं). D_2 छिन्नधन्वानां. —[c]) K_1 निर्भिभेद. D_1 M_1 महाराज; T G M_{2-5} तदा राजा (T_2 M_2 राजन्) (for रणे राजा).

16 K_5 om. 16 (cf. v. l. 12). —[a]) T संचरंश् (for सत्वरं). D_2 वाहांस् (for राजंस्). D_1 स सत्वरं रणे राजा. —[b]) D_2 तस्य राजन्; D_3 T_1 G M वाहांस्तस्य (by transp.); T_2 अश्वांस्तस्य. B_2 महाबलः; D_2 महायशाः (for °त्मनः). —[c]) K_{2-4} D_1 G_3 तीक्ष्णैः (for क्षिप्रं). —[d]) $Ś_1$ $K_{0.2.3}$ G_2 स महाबलः; K_4 सुमहात्मनः (for °बलः). Da Dn_1 D_5 क्षिप्रहस्तो (Da_1 °स्ता) महाबलः; D_8 $G_{1.3}$ सुतं चास्य (D_8 चैव) महाबलः; T_2 ससुतं च महाबलः.

17 K_5 om. 17 (cf. v. l. 12). —[a]) D_1 स हताश्वं (for हताश्वं तु). —[b]) K_3 B Da_1 Dn $D_{2.4.6-8}$ T_1 G $M_{1-3.4}$ राज्ञश्च; Da_2 $D_{3.5}$ M_4 राज्ञोस्य; T_2 राज्ञः स (for राज्ञस्तु). S विक्रमं (for पौरुषम्). D_1 दृष्ट्वा तस्य पराक्रमं. —[c]) $B_{2.3}$ अभिदुद्राव; D_1 विदुद्रुवे च; T_2 स प्रदुद्राव (for विप्र°). —[d]) B Da Dn $D_{4.5.8}$ S समरात् (for समरे). T_1 G ततः (for तदा).

18 K_5 om. 18 (cf. v. l. 12). —[a]) Da_2 महाश्वासे. —[c]) T_2 °वधं (for °बलं). D_1 श्रेष्ठं (for राजन्). —[d]) D_1 राजन् (for सर्वम्). K_1 पराङ्मुखा (sic).

19 K_5 om. 19 (cf. v. l. 12). —[a]) D_1 एवं (for एतत्). D_2 श्रुत्वा (for कृत्वा). $K_{1.2}$ महाराजो. S एवं जित्वा रणे राजन्. —[b]) $Ś_1$ Da_2 Dn_2 $D_{1.3-5.7.8}$ M_4 धर्मराजो (for °पुत्रो). —[c]) S यथा (T_2 नर-) व्याघ्रस् (for यथा कालस्). —[d]) K_3 D_2 S तत् (M_2 यत्) (for ह).

20 K_5 om. 20 (cf. v. l. 12). —[a]) $K_{0.2}$ B_{2-4} Da_2 Dn $D_{1.3.4.7.8}$ चेकितानश्च; Da_1 D_6 °तानस्य (for °तानस्तु). —[c]) $K_{2.3}$ $D_{2.3.6.8}$ प्रेक्ष्यतां; D_7 पश्यतां. — Ko lacuna for 20[d]; K_1 om. 20[d]. —[d]) K_4 B_4 शायकैः; D_3 चाहवे (for सायकैः).

21 K_5 om. 21 (cf. v. l. 12). —[a]) D_3 T_2 M ततस्; D_5 शरैस् (for शरांस्). D_3 तांस्तान्; T_2 तं तु (for तांस्तु). —[c]) D_1 S यत्तो (T_2 युक्तो) (for यत्तं). —[d]) M (except M_4) विव्याध नृप पत्रिभिः.

22 K_5 G_2 om. 22 (for K_5, cf. v. l. 12). —[b]) $Ś_1$ K_{0-2} भारत; Da_1 मारिषः. —[c]) T_2 चापि (for चास्य). $B_{2.3}$ Da Dn_1 $D_{3.5}$ भल्लेन (for समरे). —[d]) $B_{2.3}$ रथोपस्थादपातयत्. — G_3 om. (hapl.) 22[e]–23[f]. —[e]) K_3 $D_{2.6}$ अश्वांश् (for हयांश्). D_1 हयांश्चाप्यवधीद्राजन्. —[f]) $K_{3.4}$ B Dn_2

C.6.3718
B.6.84.23
K.6.84.23

सोऽवप्लुत्य रथात्तूर्णं गदां जग्राह सात्वतः ।
स तया वीरघातिन्या गदया गदिनां वरः ।
गौतमस्य हयान्हत्वा सारथिं च न्यपातयत् ॥ २३
भूमिष्ठो गौतमस्तस्य शरांश्चिक्षेप षोडश ।
ते शराः सात्वतं भित्त्वा प्राविशन्त धरातलम् ॥ २४
चेकितानस्ततः क्रुद्धः पुनश्चिक्षेप तां गदाम् ।
गौतमस्य वधाकाङ्क्षी वृत्रस्येव पुरंदरः ॥ २५
तामापतन्तीं विमलामश्मगर्भां महागदाम् ।
शरैरनेकसाहस्रैर्वारयामास गौतमः ॥ २६

चेकितानस्ततः खड्गं कोशादुद्धृत्य भारत ।
लाघवं परमास्थाय गौतमं समुपाद्रवत् ॥ २७
गौतमोऽपि धनुस्त्यक्त्वा प्रगृह्यासिं सुसंशितम् ।
वेगेन महता राजंश्चेकितानमुपाद्रवत् ॥ २८
तावुभौ बलसंपन्नौ निस्त्रिंशवरधारिणौ ।
निस्त्रिंशाभ्यां सुतीक्ष्णाभ्यामन्योन्यं संततक्षतुः ॥ २९
निस्त्रिंशवेगाभिहतौ ततस्तौ पुरुषर्षभौ ।
धरणीं समनुप्राप्तौ सर्वभूतनिषेविताम् ।
मूर्छयाभिपरीताङ्गौ व्यायामेन च मोहितौ ॥ ३०

$D_{2.4.6-8}$ उभौ तौ; D_1 उभौ वै; T_1 M_2 ततोभौ; T_2 $G_{1.4}$ $M_{1.3-5}$ तथोभौ (for उभौ च). K_1 प्राष्टिंसारथी; T_2 प्राष्टिसारथिं; G_1 M_{1-4} प्राष्ठिसारथी (M_3 °थिः); M_5 प्राष्टिसारथिः.

23 K_5 G_3 om. 23 (cf. v. l. 12, 22). —^{a}) K_{0-2} सोपप्लुत्य; B_1 D_2 स विप्लुत्य; T_1 $G_{1.2.4}$ अवप्लुत्य (for सोऽवप्लुत्य). —^{b}) K_1 सत्वतः; B_3 भारत (for सात्वतः). —^{c}) K_{0-2} तथा (for तया). Da Dn_1 D_5 रिपु° (for वीर°). —^{d}) G_2 स तथा (for गदया). S (G_3 om.) रथिनां (for गदिनां). T_2 वरं. — D_2 om. 23^c–24^d. —^{e}) B_4 महान् (for हयान्). —^{f}) T_2 स; M (except M_4) वै (for च). K_3 B_4 Da Dn $D_{1.4-6.8}$ [अ]प्यपातयत्; K_3 $B_{2.3}$ D_7 [अ]भ्यपा° (for न्यपा°).

24 K_5 D_2 om. 24 (cf. v.l. 12, 23). —^{a}) K_{0-2} भूयिष्ठो; K_3 Da_2 D_3 T_2 G_2 M भूमिस्थो. S तत्र (for तस्य). —^{b}) $Ś_1$ चिच्छेद (for चिक्षेप). D_6 om. (hapl.) from षोडश up to चिक्षेप in 25^b. D_3 षोडषः. —^{c}) B_4 transp. ते and शराः. K_3 Da_1 भीत्वा; K_4 हत्वा. —^{d}) T_1 $G_{2.4}$ प्राविशंस्तु (for °शन्त). K_3 B_1 S रसातलं (for धरा°). $Ś_1$ K_2 प्रविशन्ध(K_2 °द्ध)रणीतलं; $K_{0.1}$ D_1 प्राविशन्ध(K_0 °द्ध)रणीतलं.

25 K_5 om. 25 (cf. v. l. 12). D_6 om. up to चिक्षेप in 25^b (cf. v. l. 24). —^{a}) $G_{1.3}$ पुनः (for ततः). —^{b}) K_{0-2} transp. पुनः and गदां. T_1 $G_{2.4}$ सदा; $G_{1.3}$ तथा (for पुनश्च). D_1 वै (for तां). — $K_{0.1}$ om. (hapl.) 25^c–26^b. —^{d}) K_3 पुत्रस्येव.

26 K_5 om. 26 (cf. v. l. 12); $K_{0.1}$ om. 26^{ab} (cf. v. l. 25). —^{a}) K_4 B_4 तम् (for ताम्). K_2 B_1 Da Dn $D_{4.5.8}$ T_2 विपुलाम् (for विमलाम्). —^{b}) K_2 अस्रगर्भां; D_1 घोरशब्दां; D_2 हेमबद्धां; D_3 हेमगर्भां (for अश्म°). B_1 Da Dn_1 D_5 आकाशे महतीं गदां; S अश्मगर्भोपमां गदां (M_2 दृढां). —^{d}) $Ś_1$ क्षीरयामास (sic) (for वारया°).

27 K_5 om. 27 (cf. v. l. 12). —^{a}) S कुद्धो (for खड्गं). —^{b}) K_3 $D_{2.6}$ क्रोधाद्; K_4 B Da_2 D_7 कोषाद्; Da_1 Dn $D_{3-5.8}$ (marg. *sec. m.* as in text) कोपाद् (for कोशाद्). D_1 निर्मलं (for भारत). S गदां दृष्ट्वा निपातितां (T_2 M_4 °वारितां). —^{c}) K_{0-2} भृशमास्थाय; D_2 समुपा° (for परमा°). T $G_{1.2.4}$ M खड्ग(G_2 गदा)मादाय वेगेन; G_3 निस्त्रिंशाभ्यां सुतीक्ष्णाभ्यां.

28 K_5 D_6 om. 28 (for K_5, cf. v. l. 12). —^{a}) D_1 [ऽ]थ (for ऽपि). —^{b}) $K_{1.2}$ सुसंस्कृतं; K_3 सुशंशितं; K_4 $B_{1.3}$ सुसंस्थितः; $B_{2.4}$ Dn_2 $D_{4.7.5}$ सुसंयतः; Da Dn_1 D_5 स्वयं स्थितः; D_1 सुनिर्मलं; D_2 तु संसितं; D_3 सुदंसितः; T_2 शितं तदा; G_2 सुसंश्रितं; $M_{1.3.5}$ सुसंशितां. —^{c}) $B_{1.2.4}$ Dn_2 $D_{4.7.8}$ सुमहाराज (for महता राजंश्च). —^{d}) $Ś_1$ अभिद्रवत् (for उपा°).

29 K_5 om. 29 (cf. v. l. 12). —^{a}) T $G_{2.4}$ M तावुभौ रथिनां श्रेष्ठौ; $G_{1.3}$ तावभिद्रुत्य वेगेन. —^{b}) K_3 निस्तृंशवरधारिणौ; D_1 चर्मनिस्त्रिंश°; $G_{1.3}$ चर्मासिवर°. —^{d}) D_1 तौ ततक्षतुः; D_3 (marg. *sec. m.* as in text) संततद्धतुः (for संततक्षतुः).

30 K_5 om. 30 (cf. v. l. 12). —^{b}) D_1 पुरुषोत्तमौ; M_2 भरतर्षभौ. —^{c}) T_2 धरित्रीं (for धरणीं). K_0 अनुसं° (for समनु°). —^{d}) $G_{1.3}$ °ह्निते रतौ. —^{e}) G_3 मूषया (for मूर्छया). D_3 T_2 विपरीताङ्गौ

ततोऽभ्यधावद्वेगेन करकर्षः सुहृत्तया ।
चेकितानं तथाभूतं दृष्ट्वा समरदुर्मदम् ।
रथमारोपयच्चैनं सर्वसैन्यस्य पश्यतः ॥ ३१
तथैव शकुनिः शूरः स्यालस्तव विशां पते ।
आरोपयद्रथं तूर्णं गौतमं रथिनां वरम् ॥ ३२
सौमदत्तिं तथा क्रुद्धो धृष्टकेतुर्महाबलः ।
नवत्या सायकैः क्षिप्रं राजन्विव्याध वक्षसि ॥ ३३
सौमदत्तिरुरःस्थैस्तैर्भृशं बाणैरशोभत ।
मध्यंदिने महाराज रश्मिभिस्तपनो यथा ॥ ३४
भूरिश्रवास्तु समरे धृष्टकेतुं महारथम् ।
हतसूतहयं चक्रे विरथं सायकोत्तमैः ॥ ३५
विरथं चैनमालोक्य हताश्वं हतसारथिम् ।
महता शरवर्षेण छादयामास संयुगे ॥ ३६
स च तं रथमुत्सृज्य धृष्टकेतुर्महामनाः ।
आरुरोह ततो यानं शतानीकस्य मारिष ॥ ३७
चित्रसेनो विकर्णश्च राजन्दुर्मर्षणस्तथा ।
रथिनो हेमसंनाहाः सौभद्रमभिदुद्रुवुः ॥ ३८
अभिमन्योस्ततस्तैस्तु घोरं युद्धमवर्तत ।
शरीरस्य यथा राजन्वातपित्तकफैस्त्रिभिः ॥ ३९
विरथांस्तव पुत्रांस्तु कृत्वा राजन्महाहवे ।

C. 6. 3737
B. 6. 84. 42
K. 6. 84. 42

(for [अ]भिपरी°). —^{f}) K2 Da Dn D4. 5. 7. 8 वि-; D3 तु (for च). B1 मूर्च्छितौ (for मोहितौ).

31 K5 om. 31 (cf. v. l. 12). D1. 2 om. 31^{ab}. —^{b}) K3 G3 करकर्ष-; B3 काशिराजः; T2 G2 भीमसेनः; Ca. c करकर्षः (as in text). Da1 कारूपः सुमहत्तया. —^{c}) B1 Da2 Dn1 चेकितानस्. T2 तदा (for तथा-). Da Dn1 D5 तूर्णं (for -भूतं). D1 ततस्तु सात्वतं शूरं; D2 नकुलस्त्वरयागत्य. —^{d}) K0. 1. 3 B1. 2. 4 Da2 D3. 6 समरदुर्मदः; K4 G2 M (except M4) °दुर्जयं. D1. 2 चेकितानं महारथं. —^{e}) K1–3 रथमारोपयश्चैनं (K1 °तं); D1 रथमारोपयामास; D2 आरोपयद्रथं राजन्. —^{f}) Ś1 रथमन्यस्य पश्यतः; D1 धृष्टद्युम्नो महारथः; D2 मूर्च्छितं वीरमच्युतः.

32 K5 om. 32 (cf. v. l. 12). —^{a}) G2 शूर. —^{b}) K3 Da2 D2. 3 (marg. *sec. m.*). 6 शालस्; K4 B Da1 Dn D1. 5. 7. 8 श्यालस्; D3 पालस् (for स्यालस्). K8 तत्र (for तव). —^{c}) K2 D8 अरोपयद्. —^{d}) D5 वर; D8 वरः (for वरम्).

33 K5 om. 33 (cf. v. l. 12). —^{a}) T2 G1. 2 सोमदत्तिं; M3. 5 सोमदत्तिस्. B2 Da Dn1 D5 रणे; S ततः (for तथा). —^{b}) D1 महारथः (for °बलः). —^{c}) D1 तूर्णं; D2 क्षिप्रै; S तीक्ष्णै (for क्षिप्रं). B1 Da Dn D4–8 नवत्या निशितैर्बाणैः.

34 K5 om. 34 (cf. v. l. 12). —^{a}) K2. 8 Da1 T G1. 2 M2 सोमदत्तिर् (for सौम°). K0 उपस्थैस्; Da1 D6 उरुस्थैस्. T2 स (for तैर्). Ś1 सोमदत्तकरास्तैस्तैर्. — Dn1 om. 34^{c}–35^{d}.

35 K5 Dn1 om. 35 (cf. v. l. 12, 34). —^{a}) K3 सु-; B4 च (for तु). —^{b}) Ś1 Da2 G2 धृष्टकेतुर्; Da1 धूमकेतुर्. Ś1 B1. 2. 4 Da2 Dn2 D4–6. 8 महारथः; Da1 °रथाः. —^{c}) Da D1. 5 °रथं (for °हयं). —^{d}) D5 विरथे.

36 K5 om. 36 (cf. v. l. 12). —^{a}) Da1 D3. 5 चैवम् (for चैनम्). K3 D2. 6 तं समालोक्य; D1 च समा°; T2 M4 तु समा° (for चैनमा°).

37 K5 om. 37 (cf. v. l. 12). —^{a}) Dn1 D3 तु (for च). —^{b}) D1. 3 महाबलः; G2 महात्मनः (for °मनाः). —^{c}) S रथं (for ततो). Ś1 K3 D1. 3 Cv वाहं; K0. 1 वाक्यं; T1 G तूर्णं; T2 M क्षिप्रं (for यानं). —^{d}) S भारत (for मारिष).

38 K5 om. 38 (cf. v. l. 12). —^{b}) G2 राजा (for राजन्). Ś1 K0–2. 4 दुर्योधनस्; T2 दुर्मंत्रिणस्; G1. 3 दुर्द्धर्षणस् (for दुर्म°). B4 तदा; D3 तव (for तथा). —^{c}) D2 हेमसंनद्धाः (for °संनाहाः). —^{d}) G3 सौभद्रिम्.

39 K5 om. 39 (cf. v. l. 12). —^{a}) K3 ततस्तेषु; B4 ततस्तैश्च; D1 च तैः सार्द्धं; T2 तु तैर्वीरैर् (for ततस्तैस्तु). —^{b}) Ś1 घनं (for घोरं). —^{c}) M2 शरीरस्तु (for °रस्य). —^{d}) M1. 2. 3. 5 (the latter two *sup. lin.*) °कफादिभिः.

40 K5 om. 40 (cf. v. l. 12). D2 om. (hapl.) 40^{a}–41^{b}. —^{a}) D1 तत्र (for तव). K3 विरथास्तव पुत्रास्तु. —^{b}) M3. 5 transp. कृत्वा and राजन्. Da1 सुकृत्वा राजमाहवे. —^{c}) B4 नाजघान; T2 G1–3

न जघान नरव्याघ्रः स्मरन्भीमवचस्तदा ॥ ४०
ततो राज्ञां बहुशतैर्गजाश्वरथयायिभिः ।
संवृतं समरे भीष्मं देवैरपि दुरासदम् ॥ ४१
प्रयान्तं शीघ्रमुद्वीक्ष्य परित्रातुं सुतांस्तव ।
अभिमन्युं समुद्दिश्य बालमेकं महारथम् ।
वासुदेवमुवाचेदं कौन्तेयः श्वेतवाहनः ॥ ४२
चोदयाश्वान्हृषीकेश यत्रैते बहुला रथाः ।
एते हि बहवः शूराः कृतास्त्रा युद्धदुर्मदाः ।
यथा न हन्युर्नः सेनां तथा माधव चोदय ॥ ४३
एवमुक्तः स वार्ष्णेयः कौन्तेयेनामितौजसा ।
रथं श्वेतहयैर्युक्तं प्रेषयामास संयुगे ॥ ४४
निष्टानको महानासीत्तव सैन्यस्य मारिष ।
यदर्जुनो रणे क्रुद्धः संयातस्तावकान्प्रति ॥ ४५
समासाद्य तु कौन्तेयो राज्ञस्तान्भीष्मरक्षिणः ।
सुशर्माणमथो राजन्निदं वचनमब्रवीत् ॥ ४६
जानामि त्वां युधि श्रेष्ठमत्यन्तं पूर्ववैरिणम् ।
पर्यायस्याद्य संप्राप्तं फलं पश्य सुदारुणम् ।
अद्य ते दर्शयिष्यामि पूर्वप्रेतान्पितामहान् ॥ ४७

निज° (for न ज°). K3 G1-3 M नरव्याघ्र; D8 °व्याघ्राः. — d) S स्मृत्वा (for स्मरन्). Ś1 भीमवरस्; G2 भीष्मवचस्. T2 तथा (for तदा). B4 स्मरंतं से वचस्तदा; D1 स्मरन्भीमस्य तद्वचः.

41 K5 om. 41 (cf. v. l. 12). D2 om. 41ab (cf. v. l. 40). — b) B2. 3 °योधिभिः; D1 °पत्तिभिः; S °सादिभिः. — c) K0-2 प्रवृत्ते; Dn1 संवृत्तं; T2 संवृतः. — d) G2 दैवैरपि. K4 दुरासदः.

42 K5 om. 42 (cf. v. l. 12). — a) Ś1 K0-3 D2 प्रयातं; G2 प्रायांतं. — b) Ś1 सुतां; K3 D2 M1 सुतास् (for सुतांस्). — c) T1 G M समुद्वीक्ष्य; T2 च वीक्ष्याथ (for समुद्दिश्य). — d) M1. 3. 5 बालमेतं. D6 (sup. lin. as in text) दुरासदं; S महाबलं (for °रथम्). — G1. 3 om. (hapl.) 42f-44a.

43 K5 G1. 3 om. 43 (cf. v. l. 12, 42). — a) K3 Da1 D1. 2. 5. 6 नोदय; K4 देशय; Cc साधय (for चोदय). — b) K2 यत्रेते; D6 यतते; T2 यत्रैव (for यत्रैते). K0 T G M4 बहुला ध्वजाः; M1-3. 5 विपुल(M2 °ला)ध्वजाः (for बहुला रथाः). — c) Ś1 K3. 4 B Da Dn D1. 4-7 हन्युर्न नः; D2 हन्युर्नराः (marg. sec. m. °र्नाम); D8 (marg. sec. m. as in text) हन्युस्ततः (for न हन्युर्नः). K0-2 सेनां नः (by transp.); T G2. 4 M नः सैन्यं. — f) K3 D1. 2 माधव नोदय; T1 G2. 4 चोदय माधव (by transp.).

44 K5 om. 44 (cf. v. l. 12). G1. 3 om. 44a (cf. v. l. 42). — a) Da1 Dn1 उक्ता; D5 उक्त्वा (for उक्तः). Da Dn1 D5 तु (for स). — b) G1. 3 कौंतेयोपि (for °येन). T G2-4 M महात्मना; G1 महामनाः (for [अ]मितौजसा). — After 44ab, G1. 3 ins.:

327* सत्वरं बालरक्षार्थं गच्छावेति धनंजयः ।

— d) K0-2 D2 प्रेरयामास (for प्रेष°).

45 K5 om. 45 (cf. v. l. 12). — a) T2 कष्टतरा; G2 निष्टानेको; Cc निष्टानको (as in text). T1 G महाराज (for महानासीत्). — b) D1. 2 भारत (for मारिष). — c) T1 M2 यदार्जुनो. — d) Ś1 संयतस्; K1 संयातास्; B2-4 D8 संजातस्; S प्रयातस् (for संयातस्). D1. 3 संयत्त(D3 °याता)स्तव वाहिनीं.

46 K5 om. 46 (cf. v. l. 12). — a) Da1 D कौंतेय. — b) K1 राज्ञास्; D8 T2 M2 राजंस् (for राज्ञस्). D1 भीष्मनोदितान्; S भीषयन्युधि (for भीष्मरक्षिणः). — c) M2 अहो (for अथो). T1 G अर्जुनस्सुशर्माणम्.

47 K5 om. 47 (cf. v. l. 12). — a) K4 B1. 3 D8 T2 युधां; T1 G रथ- (for युधि). — b) K0. 1 D6 सत्यं तं; T2 समर्थं (for अत्यन्तं). K3 अत्यं मानिनं तथा; D2 (before corr. as in text) नितांतं मानिनं जितं. — After 47ab, K3 D2 ins.:

328* ततस्त्वं समरे योद्धुं राजभिर्बहुभिर्वृतः ।

— c) K4 B Da Dn D4-8 अनयस्याद्य; D1 पर्यायाद्य (for पर्यायस्याद्य). K3 पर्यायेणाद्य संप्राप्तः; D2 पुरस्ताद्य संप्राप्तः; T1 G4 पर्यायस्य समं पक्वं; T2 M1 तस्य वैरस्य संपर्कं (M1 °क्कं); G1-3 M3. 5 पर्यायस्यास्य (M5 °स्याथ) संपर्कं; M1 (sup. lin.). 2. 4 पर्याय(M4 अनय)स्याद्य पक्वस्त्वं. — d) Dn2 D1. 7 पश्यस्व (for पश्य सु°). T1 G4 फलं पश्यसि दारुणं. — e) D1 अथ (for अद्य). B Da2 Dn2 D1-5. 7. 8 S त्वां (for ते). T1 G4 गमयिष्यामि; G2 द्रावयिष्यामि (for दर्श°).

एवं संजल्पतस्तस्य बीभत्सोः शत्रुघातिनः ।
श्रुत्वापि परुषं वाक्यं सुशर्मा रथयूथपः ।
न चैनमब्रवीत्किंचिच्छुभं वा यदि वाशुभम् ॥ ४८
अभि गत्वार्जुनं वीरं राजभिर्बहुभिर्वृतः ।
पुरस्तात्पृष्ठतश्चैव पार्श्वतश्चैव सर्वतः ॥ ४९
परिवार्यार्जुनं संख्ये तव पुत्रैः सहानघ ।
शरैः संछादयामास मेघैरिव दिवाकरम् ॥ ५०
ततः प्रवृत्तः सुमहान्संग्रामः शोणितोदकः ।
तावकानां च समरे पाण्डवानां च भारत ॥ ५१

इति श्रीमहाभारते भीष्मपर्वणि अशीतितमोऽध्यायः ॥ ८० ॥

८१

संजय उवाच ।
स तुद्यमानस्तु शरैर्धनंजयः
पदा हतो नाग इव श्वसन्बली ।
बाणेन बाणेन महारथानां

C. 6. 3751
B. 6. 85. 1
K. 6. 85. 1

---

48 K5 om. 48 (cf. v. l. 12). — a) Da1 Dn D1. 6. 8 प्रजल्पतस्. — b) K3 विभत्सोः. Ś1 B4 Dn2 D1. 4. 6. 7 T G4 M1. 3 शत्रुतापनः; D8 G1-3 M3. 5 °तापिनः (for °घातिनः). — c) B2 G1 स; Da2 D5 तु; D1 [श्रु]थ; G3 सु- (for [श्रु]त्वापि). Da1 D8 (before corr.) G1 पुरुषं; D2 समरे (for परुषं). M (except M4) परुषा वाचः (for परुषं वाक्यं). — d) D2 परुषं (for सुशर्मा). K1 रथपूरयः (sic); K4 °सत्तमः (for °यूथपः). — e) Da1 न चैवम्; D8 नैवैतम् (for न चैनम्).

49 K5 om. 49 (cf. v. l. 12). — a) K (K5 om.) B D (except D3. 6) अभिगम्यार्जुनं; M2 अभिहत्यार्जुनं. D6 om. (hapl.) from वीरं in 49a to र्यार्जुनं in 50a. D3 संख्ये; G2 वीर्यं; G3 वीर (for वीरं). — b) G3 वृतं; M2 स्मृतः (for वृतः). — c) Ś1 कष्टतश् (for पृष्ठतश्). D1 पार्श्वं पुरोग्रतश्चैव. — d) D1 पृष्ठतश् (for पार्श्वतश्). K3 D2 T1 G चापि (for चैव). Ś1 B1-3 Da Dn1 D1. 3. 5 S (except T2 M4) सर्वशः; K3 सर्वगः.

50 K5 om. 50 (cf. v. l. 12). D6 om. up to र्यार्जुनं in 50a (cf. v. l. 49). — a) K1 T2 G1. 3 M संख्ये; G2 संघे (for संख्ये). — b) T2 पांडुपुत्रस्; G2 तव पुत्रस् (for तव पुत्रैः). K1 महानघ; B1 महारथः; D3 सुसंवृतः; T G तथा(T2 °दा)नघ (for सहानघ). B4 Dn D1. 4. 6-8 तव पुत्रा महारथाः. — c) B4 Dn2 D1. 4. 6-8 T2 M1 (*sup. lin.*). 2 संछादयामासुर्. — d) B3 Dn2 D1. 4. 6-8 मेघा इव.

51 K5 om. 51 (cf. v. l. 12). — a) D1 संग्रामः (for सुमहान्). B2-4 Da Dn D1. 5. 7. 8 S ततः प्रवृत्ते (Da1 D5 °र्तते) घोरः. — b) D1 सहसा (for संग्रामः). K1 शोणितोदकं. — c) Ś1 Da Dn1 D3. 5 S परेषां च (for च समरे). — d) K3 पांडूनां भरतर्षभ; D8 समरे चैव भारत; S दारुणो (M1 *sup. lin.* संग्रामे; M2 संग्रामो) रोमहर्षणः (M4 °णं).

Colophon om. in K5. — *Sub-parvan:* Omitting sub-parvan name, K0-2 D8 mention only सप्तमयुद्धदिवसे (D8 °दिवसयुद्धे); K4 Da Dn1 D5 सप्तमेह्नि; M3-5 सप्तमेह्निके. — *Adhy. name:* Ś1 संकुलयुद्धं; K4 D6 G2 M1. 2 द्वंद्वयुद्धं. — *Adhy. no.* (figures, words or both): Da2 (*sec. m.*) 42; Dn2 M5 82; D6 T1 G 79; T2 M3. 4 81; M1. 2 80 (as in text). — *Śloka no.:* Dn1 51; Dn2 D5. 6 55.

81

1 K5 om. 1-14 (cf. v. l. 6. 80. 12). — a) K4 B D1-3. 6 ताड्य°; T2 तुद्य° (for तुद्य°). M3 (*sup. lin.* as in text) परैर् (for शरैर्). — b) Ś1 इवोच्छ्वसन्; K0. 2 D3 G2 इवाश्वसन् (for इव श्वसन्). K3 D2 बलात् (for बली). D1 पदा हतो नाग इवातिहृष्टः. — c) Dn1 m (orig. as in text) बाढेन (for

C. 6. 3751
B. 6. 85. 1
K. 6. 85. 1

चिच्छेद चापानि रणे प्रसह्य ॥ १
संछिद्य चापानि च तानि राज्ञां
तेषां रणे वीर्यवतां क्षणेन ।
विव्याध बाणैर्युगपन्महात्मा
निःशेषतां तेष्वथ मन्यमानः ॥ २
निपेतुराजौ रुधिरप्रदिग्धा-
स्ते ताडिताः शक्रसुतेन राजन् ।
विभिन्नगात्राः पतितोत्तमाङ्गा
गतासवश्छिन्नतनुत्रकायाः ॥ ३
महीं गताः पार्थबलाभिभूता
विचित्ररूपा युगपद्विनेशुः ।
दृष्ट्वा हतांस्तान्युधि राजपुत्रां-
स्त्रिगर्तराजः प्रययौ क्षणेन ॥ ४
तेषां रथानामथ पृष्ठगोपा
द्वात्रिंशदन्येऽभ्यपतन्त पार्थम् ।
तथैव ते संपरिवार्य पार्थं
विकृष्य चापानि महारवाणि ।
अवीवृषन्बाणमहौघवृष्ट्या
यथा गिरिं तोयधरा जलौघैः ॥ ५
संपीड्यमानस्तु शरौघवृष्ट्या
धनंजयस्तान्युधि जातरोषः ।
षष्ट्या शरैः संयति तैलधौतै-

---

the first बाणेन). T_2 M_4 बाणांश्च ; G_{1-3} बाणानि ; $M_{1-3, 5}$ बाणांस्तु (for the second बाणेन). Cc बाणेन (as in text). — [d]) K_3 transp. चिच्छेद and चापानि. K_3 D_2 ततः प्रहस्य (for रणे प्रसह्य). Cc cites प्रसह्य (as in text).

2 K_5 om. 2 (cf. v. l. 1). — [a]) Dn_1 m (orig. as in text) संच्छिद्; Dn_2 D_4 चिच्छेद ; D_2 सिंच्छिद्य (for संछिद्य). $K_{0.1}$ राजंस् ; K_3 D_2 तेषां (for राज्ञां). — [b]) K_3 D_2 राज्ञां (for तेषां). G_2 क्षणे (for रणे). D_1 जवेन ; T_1 G_4 प्रसह्य ; G_3 रणेन (for क्षणेन). — [d]) $K_{2.3}$ निशेषतां ; Da_1 निशैषतां ; D_6 निःशेषतास् ; T_1 G_4 M_4 निःशेषतस् ; G_{1-3} $M_{2.5}$ विशेषतस् (G_2 °तास् ; M_2 °तांस् ; M_5 °तां). K_1 तेथ मन्यमानः (submetric); D_2 तेप्यवमन्यमानाः ; D_6 ते अपि मन्यमानाः ; T_1 G_4 तेष्वथ मानवेंद्रा ; G_2 तेष्वथ युध्यमानः. Cc cites मन्य° (as in text).

3 K_5 om. 3 (cf. v. l. 1). — [a]) K_3 निष्पेतुराजौ. K_2 रुधिरप्रदिग्धांस् ; Dn_1 रुधिरप्रतिदिग्धास् ; D_6 रुधिरप्रदग्धास् ; D_8 °प्रदीग्धास् ; S रुधिरोक्षि(T_2 °राक्ष)तांगास्. — [b]) T_1 G_4 संत्रासिता (for ते ताडिताः). M (except M_4) तेन (for राजन्). — [c]) K_1 Da_1 विभिन्नगात्रां. — [d]) K_2 गतामवच्छिन्नतनुत्रकायाः ; T_2 निकृत्तचापा विगतार्धकायाः.

4 K_5 om. 4 (cf. v. l. 1). — [a]) Ś1 $D_{2.3}$ महीगताः ; K_4 B_1 Da Dn_1 D_5 महारथाः ; B_2 महाबलाः ; D_6 महिं गताः. K_{0-2} पार्थशराभिभूताः ; D_1 पार्थबलाभिपीडिता. — [b]) D_2 विरूप*क्ता ; G_2 विचित्रकूर्पा (for °रूपा). K_{0-2} युगपद्विनेदुः ; D_5 °पद्विनेपुः ; S °पन्महारथाः. — [c]) Da_1 Dn_1 हतास्तान्. K_2 राजपुत्रां ; D_8 °पुत्रास्. — [d]) Da_1 त्रैगर्तराजः ; D_2 M_4 त्रिगर्तराजा. K_4 $B_{1.3.4}$ Da Dn $D_{1.4-8}$ रथेन (for क्षणेन). D_3 M_{1-3} त्रिगर्तराजोपययौ क्षणेन.

5 K_5 om. 5 (cf. v. l. 1). — [b]) K_{0-2} द्वात्रि(K_0 °त्रिं)शतोन्ये ; T_2 विचित्रमन्ये ; M_4 द्विर्स्त्रींशदन्ये (for द्वात्रिंशदन्ये). K_3 M_4 न्यपतंत ; T_1 G_4 व्यपतंत ; $G_{1.3}$ [ऽ]प्यपतंत ; G_2 व्यपयंत (for ऽभ्यपतन्त). D_1 षष्टिः प्रयाता व्यहनंस्तु पार्थं. — D_2 om. (hapl.) 5[c]. — [c]) Ś1 ततस्तु (for तथैव). K_{0-2} D_7 ते तं ; Dn_2 $D_{4.8}$ (the last two before corr.) तेषां ; D_1 ते वै (for ते सं). — [d]) K_{0-2} प्रकृष्य ; K_3 D_1 विक्षिप्य ; T G निकृष्य (for विकृष्य). K_3 D_2 महाधनानि ; K_4 शरारवाणि (for महा°). — [e]) K_3 आवीवृषन् ; T_1 $G_{1.3.4}$ M सिषेचिरे ; T_2 ववर्षिरे ; G_2 सिषेविरे ; Cc अवीवृषन् (as in text). K_3 Da_1 बाणमहोघ° ; M (except M_4) बाणमयौघ°. — Ś1 om. (hapl.) 5[f]–6[a]. — [f]) D_2 गिरौ (for गिरिं).

6 K_5 om. 6 (cf. v. l. 1). Ś1 om. 6[a] (cf. v. l. 5). — [a]) $K_{1.3}$ $B_{1.2.4}$ $D_{1.4.6}$ $G_{1.3}$ $M_{1.3.5}$ स (for सं). K_{0-2} D_1 च ; D_2 स (for तु). D_4 जलौघ° (for शरौघ°). — [b]) Ś1 युधित्वा तु रोषः (sic); K_3 युधि जातरोषाः ; D_1 अभिजातरोषः ; M_4 युधि जातकोपः. — D_2 om. 6[cd]. — [c]) Ś1 T_2 वृष्ट्या ; K_{0-2} दृष्ट्वा (for षष्ट्या). K_3 शितैः ; D_1 सितैः (for

जघान तानप्यथ पृष्ठगोपान् ॥ ६
षष्टिं रथांस्तानवजित्य संख्ये
धनंजयः प्रीतमना यशस्वी ।
अथात्वरद्भीष्मवधाय जिष्णु-
र्बलानि राज्ञां समरे निहत्य ॥ ७
त्रिगर्तराजो निहतान्समीक्ष्य
महारथांस्तानथ बन्धुवर्गान् ।
रणे पुरस्कृत्य नराधिपांस्ता-
ञ्जगाम पार्थं त्वरितो वधाय ॥ ८
अभिद्रुतं चास्त्रभृतां वरिष्ठं
धनंजयं वीक्ष्य शिखण्डिमुख्याः ।
अभ्युद्ययुस्ते शितशस्त्रहस्ता
रिरक्षिषन्तो रथमर्जुनस्य ॥ ९
पार्थोऽपि तानापततः समीक्ष्य
त्रिगर्तराज्ञा सहितान्नृवीरान् ।
विध्वंसयित्वा समरे धनुष्मा-
न्गाण्डीवमुक्तैर्निशितैः पृषत्कैः ।
भीष्मं यियासुर्युधि संददर्श
दुर्योधनं सैन्धवादींश्च राज्ञः ॥ १०
आवारयिष्णूनभिसंप्रयाय
मुहूर्तमायोध्य बलेन वीरः ।
उत्सृज्य राजानमनन्तवीर्यो
जयद्रथादींश्च नृपान्महौजाः ।
ययौ ततो भीमबलो मनस्वी

C. 6. 3763
B. 6. 85. 13
K. 6. 85. 12

शरैः). K2 °संयत°; Da1 संयती; D5 संघति; D6 संप्रति (for संयति). — d) K3 तान[? ना]श्चथ; D1 चैनानथ; T2 तान्यप्यथ.

7 K5 om. 7 (cf. v. l. 1). — a) D5 षष्ट्यं. K3 रथाश्च तास्तान्; D2 रथांश्च तांस्तान् (for षष्टिं रथांस्तान्). B Da Dn D4-8 अभिजित्य; D2 विनिहत्य (for अवजित्य). S संखे (G2 संवे). — b) K2 G3 M5 प्रीतिमना; D6 प्रितमना. — c) K3 अथातरद्; B2 अथाद्रवद्; Da1 Dn1 D3 (marg. *sec. m.* as in text) अथात्वरन्; D1 अतस्त्वरन्; T1 G2.4 अति त्वरन्; T2 प्रचिन्वते; G1.3 स सत्वरो; M अतत्वरद् (M4 °न्) (for अथात्वरद्). — d) K3 वरास्तु (for बलानि). K3 राज्ञः; B2-4 D4 राजन् (for राज्ञां). K0-2 विनिघ्न(K0 °घ्ना)न्; B2 [ऽ]भिहत्य; T1 G निपात्य (for निहत्य).

8 K5 om. 8 (cf. v. l. 1). — a) K3 D2 (before corr.).8 °राजा; Da1 °राज्ञा (for °राजो). G3 निशितान् (for निह°). — b) K3 B D (except D2) S महात्मना (for महारथांस्). Ś1 बंधुवर्गं. — c) D1 राजन् (for रणे). K2.3 नराधिपास्; K4 रणाधिपास्; D1 T1 G महारथांस् (for नराधिपांस्). — d) Ś1 T2 पार्थं. D1.2 जयाय (for वधाय).

9 K5 D2 om. 9 (for K5, cf. v. l. 1). — a) Ś1 अत्यद्भुतं (for अभिद्रुतं). K0-2 D6 शस्त्रभृतां (K1 °तं); Da Dn D4.5.8 चा(Da1 वा)स्त्रविदां; D1 चापभृतां (for चास्त्र°). — c) B4 प्रत्युद्ययुस्ते. K0-2 शतशस्त्रहस्ता; D1 रथ(m भृश)चाप°; D8 सितशस्त्र° (for शितशस्त्र°). S अभिद्रुताः शस्त्रशरौघवृष्ट्या (T1 G4 °रथौघवृष्ट्या; T2 M °शरौघवर्षैः). — d) K0.1 Da1 रिरिक्षिषंतो; D5 रिरक्षिसंतो. S समंततः पार्थरथं ररक्षुः.

10 K5 om. 10 (cf. v. l. 1). — b) Da1 M3 सहिता; G1-3 सह तान्. K3 समीक्ष्य (for नृवीरान्). — c) B1 Da Dn D4.5.7.8 S स महाधनुष्मान् (for समरे धनुष्मान्). — d) Ś1 निपतैः; D6 प्रपतैश्च (for निशितैः). K0 पृषद्कैः; D2 सुतीक्ष्णैः; D6 च तीव्रैः (for पृषत्कैः). — e) Dn2 D4.6.8 यियासुं; D5 पियासुर्; T2 यथासुर् (for यियासुर्). — f) K3 T2 राजन्; D1 सर्वान् (for राज्ञः).

11 K5 om. 11 (cf. v. l. 1). D2 om. 11[ab]. — a) Ś1 अवारयिष्णुर्; K0-3 Da D5 आवारयिष्यन्; K3 D8 अवारयि(D8 °यी)पून्; Dn1 D3 G1 अवारयिष्णून्; Cal. Bom. ed. संवारयिष्णून्. B2 Da Dn D4-8 G1-3 M अथ (for अभि-). Ś1 K5 D3 अभिसंप्रयात्वा (K5 °यातान्); K3 B3.4 अभि(K3 °ति)वारयित्वा; B1 अथ संप्रयित्वा; T1 G4 अथ संप्रसार्य (for अभिसंप्रयाय). D1 स वारयित्वा युधि संप्रयोगान्; T2 आहारयिष्यन्नथ संप्रयायान्. — b) S आसाद्य (for आयोध्य). K3 बलं नृवीर; B1 बलेन धीरः; Dn2 D4 रथेन वीरः; D3 बलेन वीर. — c) Ś1 K3.4 D2 °वीर्यं (for °वीर्यो). — d) M (except M4) रथान् (for नृपान्). K0

C 6. 3763
B. 6. 85. 13
K. 6. 85. 12

गाङ्गेयमाजौ शरचापपाणिः ॥ ११

युधिष्ठिरश्चोग्रबलो महात्मा
समाययौ त्वरितो जातकोपः ।
मद्राधिपं समभित्यज्य संख्ये
स्वभागमाप्तं तमनन्तकीर्तिः ।
सार्धं स माद्रीसुतभीमसेनै-
र्भीष्मं ययौ शांतनवं रणाय ॥ १२

तैः संप्रयुक्तः स महारथाग्र्यै-
र्गङ्गासुतः समरे चित्रयोधी ।
न विव्यथे शांतनवो महात्मा
समागतैः पाण्डुसुतैः समस्तैः ॥ १३

अथैत्य राजा युधि सत्यसंधो
जयद्रथोऽत्युग्रबलो मनस्वी ।
चिच्छेद चापानि महारथानां
प्रसह्य तेषां धनुषा वरेण ॥ १४

युधिष्ठिरं भीमसेनं यमौ च
पार्थं तथा युधि संजातकोपः ।
दुर्योधनः क्रोधविषो महात्मा
जघान बाणैरनलप्रकाशैः ॥ १५

कृपेण शल्येन शलेन चैव

नृपान्महोजाः; T_2 नृपात्मभोजाः (for नृपान्महौजाः). T_1 $G_{3.4}$ महौ(G_2 °हो)जसः (for महौजाः). — ^{e}) S ततो ययौ (by transp.). B_4 भीमबलैर्; Da_1 भीमरवो; D_1 भीष्मबलं; D_5 भीमरथो; G_3 भीष्मबलौ (for भीमबलो). D_1 महात्मा; T G यशस्वी (for मनस्वी). — ^{f}) K_3 नृप चापपाणिः. — After 11, T_1 G ins.:

329* भीष्मोऽपि दृष्ट्वा समरे कृतास्त्रा-
न्स पाण्डवानां रथिनोऽभ्युदारान् ।
विहाय संग्राममुखे धनंजयं
जवेन पार्थं पुनराजगाम ।

12 K_5 om. 12 (cf. v. l. 1). — ^{a}) K_{0-2} चोग्ररूपो; K_4 B च प्रबलो; D_1 संप्रययौ; D_8 भीमबलो (for चोग्रबलो). $D_{1.6}$ मनस्वी (for महात्मा). — ^{b}) K_3 समाययो; D_1 समागतांस् (for °ययौ). Da_1 त्वरितौ. — D_2 om. 12^{cd}. — ^{c}) M_2 संपरित्यज्य (for समभि°). $G_{1.3}$ M संखे; G_2 संघे (for संख्ये). T_2 मद्राधिपत्यमभिवृत्य संखे. — ^{d}) B_2 प्रभागप्राप्तं; D_1 स्वभागमाच्छेत्; D_8 विभागप्राप्तं (for स्वभागमाप्तं). Cc cites प्राप्तम्. B_4 °कीर्तिं. S स्वभाग(T_2 सहाय-; G_{1-3} $M_{3.5}$ स्वभाव)मायांतमनंत°. — ^{e}) K_4 $D_{2.8}$ च (for स). K_3 Da_2 °भीमसेने; D_5 M_1 °भीमसेनौ (for °सेनैर्). — ^{f}) T_1 G समाययौ (for भीष्मं ययौ). B_4 जयाय (for रणाय).

13 K_5 D_2 om. 13 (for K_5, cf. v. l. 1). — ^{a}) K_{0-2} Da_1 तैः संप्रयुक्ताः; K_3 ततः सुयुक्तः; B Dn_2 $D_{5.6}$ T_1 $G_{2.4}$ तैः संप्रयुक्तैः. $K_{0.1}$ Da Dn D_6 T_2 महारथाग्रै(K_0 °ग्र्यै)र्; $K_{2.3}$ °रथोघैर्; D_8 °रथाग्र्यो. — ^{b}) Da_1 जगाम सुतः (for गङ्गासुतः). — ^{d}) $K_{0-2.4}$ Da Dn_1 $D_{1.3.5}$ M_{1-3} समागतः (for °गतैः).

14 K_5 om. 14 (cf. v. l. 1). — ^{a}) K_{0-2} उपेत्य; B_3 D_7 T_2 G_{1-3} M (except M_2) अथेत्य (for अथैत्य). Da Dn_1 D_5 राजन् (for राजा). Ś$_1$ सत्यसंधौ. K_3 तैः संप्रयुक्तास्य महारथाग्र्यैर् (cf. 13^{a}). — ^{b}) Ś$_1$ [ऽ]प्युद्धतलो; K_{0-2} $D_{3.8}$ [ऽ]प्युग्रबलो; Dn_2 D_4 ह्युग्र°; D_1 [ऽ]भ्युग्र° (for ऽत्युग्र°). K_1 समस्ते; D_8 महात्मा (for मनस्वी). Cv as in text. — ^{d}) K_3 G_3 प्रहस्य (for प्रसह्य). S बलिनां महौजाः (T_1 $G_{2.4}$ महात्मा) (for धनुषा वरेण).

15 ^{a}) Da_2 भीमसेनौ. Ś$_1$ M_5 ययौ (for यमौ). — ^{b}) Ś$_1$ K_4 $B_{1.2}$ Da Dn_1 $D_{3.5}$ S (G_1 damaged) पार्थानथो; $B_{3.4}$ पार्थं कृष्णं; D_2 पार्थान्ययौ (for पार्थं तथा). B_3 D_1 संजातरोषः; T_2 °कोपान् (for °कोपः). K_5 पार्थानथो युधि जातकोपः; Dn_2 $D_{4.6-8}$ कृष्णं च पार्थं च युधि जातकोपः. — ^{c}) D_1 दुर्योधन- (for °धनः). D_4 वैरविषो; D_6 क्रोधविशो; T_2 °वशो (for °विषो). — ^{d}) D_1 अतुल° (for अनल°).

16 ^{a}) K_5 रूपेण; Da_1 D_7 कृपेन. D_5 वशेन (for शलेन). — ^{b}) Ś$_1$ K_{0-2} चापि; D_1 राज्ञा; D_7 चात्मा; D_8 वाजौ; M_1 (*sup. lin.*) चादौ (for चाजौ). — After 16^{ab}, D_1 ins.:

330* ते वारिधाराश्च यथाद्रिराजं
तथा च वर्षन्ति महानुभावाः ।

— D_7 om. (hapl.) 16^{c}–17^{c}. — ^{c}) B_4 विद्धः; D_8 सिद्धाः. B_4 सो; G_{1-3} M (except M_4) तैर् (for ते). K_{0-2} [ऽ]तिविवृद्धकोपात् (K_0 °पा); B_4 Dn_2

तथा विभो चित्रसेनेन चाजौ ।
विद्धाः शरैस्तेऽतिविवृद्धकोपै-
र्देवा यथा दैत्यगणैः समेतैः ॥ १६
छिन्नायुधं शांतनवेन राजा
शिखण्डिनं प्रेक्ष्य च जातकोपः ।
अजातशत्रुः समरे महात्मा
शिखण्डिनं क्रुद्ध उवाच वाक्यम् ॥ १७
उक्त्वा तथा त्वं पितुरग्रतो मा-
महं हनिष्यामि महाव्रतं तम् ।
भीष्मं शरौघैर्विमलार्कवर्णैः
सत्यं वदामीति कृता प्रतिज्ञा ॥ १८
त्वया न चैनां सफलां करोषि
देवव्रतं यन्न निहंसि युद्धे ।
मिथ्याप्रतिज्ञो भव मा नृवीर
रक्षस्व धर्मं च कुलं यशश्च ॥ १९
प्रेक्षस्व भीष्मं युधि भीमवेगं
सर्वांस्तपन्तं मम सैन्यसंघान् ।
शरौघजालैरतितिग्मतेजैः
कालं यथा मृत्युकृतं क्षणेन ॥ २०
निकृत्तचापः समरानपेक्षः
पराजितः शांतनवेन राज्ञा ।
विहाय बन्धूनथ सोदरांश्च
क यास्यसे नानुरूपं तवेदम् ॥ २१
दृष्ट्वा हि भीष्मं तमनन्तवीर्यं

C. 6. 3774
B. 6. 85. 24
K. 6. 85. 24

$D_{4.6.8}$ [ऽ]भिविवृद्धकोपैर्; T G_{1-3} विनिवद्ध°; G_4 विनिवृद्ध°; $M_{1-3.5}$ हि विवृद्ध°; M_4 [ऽ]तिविवृत्त° (for ऽतिविवृद्ध°). —^{d}) $Ś_1$ मना; B_4 द्वैवैर् (for देवा). $D_{1.3}$ देवा यथा दैत्यगणेन चाजौ.

17 D_7 om. 17^{abc} (cf. v. l. 16). —^{a}) $Ś_1$ K_4 M_3 छिन्नायुधः; T_1 G_4 M_4 भिन्नायुधं; T_2 छिन्नासिसं (sic); G_1 damaged; $G_{2.3}$ भिन्नायुधाः (for छिन्नायुधं). $K_{0.3.5}$ $B_{1.2.4}$ Da Dn_2 $D_{2-5.8}$ T_2 $G_{2.3}$ M राज्ञा; K_4 G_1 damaged. — D_1 om. (hapl.) 17^{bc}. —^{b}) $Ś_1$ प्रेक्ष्यत; B_4 प्रेक्ष्य सं°; D_6 M_4 प्रेक्ष्य स; T_2 प्राप्य च (for प्रेक्ष्य च). T_2 जातकोपाः; $M_{3.5}$ °कोपं. —^{d}) Dn_2 D_4 क्रुद्धम् (for क्रुद्ध). D_2 इवाह (for उवाच).

18 ^{a}) D_2 (marg. *sec. m.*) तदा (for तथा). D_2 तं; Cv त्वत्- (for त्वं). K_3 T_2 मे (for माम्). —^{b}) K_3 सोहं (for अहं). D_1 च; M (except M_4) हि (for तम्). —^{c}) Da_1 शरौघो; T_1 G_4 रथौघैर्; M_3 पृषत्कैर् (for शरौघैर्). D_8 अनलप्रकाशैः (for विमलार्कवर्णैः). —^{d}) K_1 वदासीति.

19 ^{a}) K_5 उवाच चैनां; $B_{1.3.4}$ $D_{1.3}$ त्वया च नैनां; D_8 त्वच्चेन चैतां (sic) (for त्वया न चैनां). S त्वया च नैषा (T_2 न चैषा) सफला कृता च. —^{b}) $Ś_1$ $K_{0-2.5}$ M_3 यत्र विहंसि; T_2 यत्र हि भत्सि; G_1 यविहनः सु°; G_3 यत्र हनः सु° (for यत्र निहंसि). Da_1 देवव्रतं यनतिहिंसि युद्धैः (sic). —^{c}) K_4 T_2 मात्र वीर; D_3 दानवीर (for मा नृवीर). —^{d}) G_1 रमस्व (for रक्षस्व). K_3 S स्वकुलं (T_2 °बलं) (for च कुलं). B Da Dn D_{4-8} transp. कुलं and यशः. D_1 च वीर्यं (for यशश्च).

20 ^{a}) K_1 $D_{1.6}$ प्रेक्ष्यस्व. K_5 G_2 भीमं; T_2 वेगं (for भीष्मं). D_5 T_2 भीष्मवेगं (for भीम°). —^{b}) $K_{2.3}$ सर्वास्. D_1 क्षिपंतं; G_2 दहंतं (for तपन्तं). K_1 सम-; D_7 T_2 युधि (for मम). K_2 सैन्यसंगान्; D_7 भीमसंघान्; T_2 सैन्यसंघात् (for सैन्य°). — K_5 om. 20^{c}–21^{d}. D_2 om. 20^{cd}. —^{c}) T_2 °मालैर्; Cc °जालैर् (as in text). K_{0-2} D_1 अतितिग्मतेजनैः (D_1 °सैः); K_4 $D_{3.6}$ S अतितिग्मवेगैः; B Da Dn $D_{4.5.7.8}$ इव (Dn_2 अति-) तिग्मतेजाः. Cc cites तिग्मतेजाः. —^{d}) B D (except D_1; D_2 om.) $G_{1.3}$ कालो. K_4 B_{1-3} Da Dn_1 $D_{3.5.8}$ S Cc. v कालकृतं; B_4 Dn_2 $D_{4.6.7}$ कालकृतः (for मृत्युकृतं). D_8 कृतेन (for क्षणेन).

21 K_5 om. 21 (cf. v.l. 20). —^{a}) K_3 D_3 निकृंत-. $K_{2.3}$ B Da Dn $D_{2.4-7}$ समरेनपेक्षः; D_1 °राद्पेत्य; D_3 °राद्पेतः; D_8 °रानपेक्ष्यः; M_4 °रे शिखंडिन्. —^{b}) K_2 राजा. K_3 चाजौ (for राज्ञा). — D_2 om. 21^{cd}. —^{c}) T_2 विधाय (for विहाय). T_2 अपि- (for अथ). —^{d}) D_6 को (for क).

22 ^{a}) $K_{0.2}$ [अ]पि; D_6 तु (for हि). Da_2 $D_{3.8}$ भीमं त्वम् (for भीष्मं तम्). —^{b}) K_3 सर्वैः T_1

C C. 6. 3774
B B. 6. 85. 24
K K. 6. 85. 24

भग्नं च सैन्यं द्रवमाणमेवम् ।
भीतोऽसि नूनं द्रुपदस्य पुत्र
तथा हि ते मुखवर्णोऽप्रहृष्टः ॥ २२
आज्ञायमानेऽपि धनंजयेन
महाहवे संप्रसक्ते नृवीर ।
कथं हि भीष्मात्प्रथितः पृथिव्यां
भयं त्वमद्य प्रकरोषि वीर ॥ २३
स धर्मराजस्य वचो निशम्य
रूक्षाक्षरं विप्रलापानुबद्धम् ।
प्रत्यादेशं मन्यमानो महात्मा
प्रतत्वरे भीष्मवधाय राजन् ॥ २४
तमापतन्तं महता जवेन
शिखण्डिनं भीष्ममभिद्रवन्तम् ।
आवारयामास हि शल्य एनं
शस्त्रेण घोरेण सुदुर्जयेन ॥ २५
स चापि दृष्ट्वा समुदीर्यमाण-
मस्त्रं युगान्ताग्निसमप्रभावम् ।
नासौ व्यमुह्यद्द्रुपदस्य पुत्रो
राजन्महेन्द्रप्रतिमप्रभावः ॥ २६
तस्थौ च तत्रैव महाधनुष्मा-
ञ्शरैस्तदस्त्रं प्रतिबाधमानः ।
अथाददे वारुणमन्यदस्त्रं

$G_{2.4}$ भिन्नं (for भग्नं). K_4 D_1 T_1 G M (except M_4) एव; B_{2-4} Da_2 Dn $D_{2.4.6-8}$ एतत्; T_2 एतं (for एवम्). —^{c}) K_5 D_2 भ्रीतोसि; Da_2 D_5 भीतोपि (for भीतोऽसि). K_{0-2} पुत्रस्. —^{d}) D_2 यथा (for तथा). $K_{0.1}$ प्रहृष्टः; K_3 [ऽ]पहृष्टः; D_1 [ऽ]प्रसन्नः; D_2 हि दृश्यः; T_1 $G_{2.4}$ [ऽ]थ नष्टः; G_1 प्रनष्टः; G_2 प्रणष्टः; Cc [ऽ]प्रहृष्टः (as in text). K_5 यथा हि ते मुख्यवर्णोष्वदृश्यः.

23 K_5 D_2 om. 23. —^{a}) K (K_5 om.) B_1 D_1 आज्ञायमानेन ($K_{0.1}$ °नोपि; K_3 °ने हि); B_{2-4} Da Dn D_{3-8} T G_4 $Ca.c$ अज्ञायमानेन (D_3 °ने तु; T G_4 °ने हि); G_{1-3} अजायमाने हि (G_2 °ने ह); $M_{1.2.4.6}$ आज्ञायमाने च (M_4 तु); M_3 अजीयमाने हि (*sup. lin.* अज्ञायमाने च) (for आज्ञायमानेऽपि). K_3 धनंजये च; D_3 °येपि; T_2 °ये तु; T_1 $G_{1.3.4}$ M (except M_4) °ये हि; G_2 °ये ह (for °येन). —^{b}) K_{0-2} D_1 संप्रसक्तो; B_1 संप्रयुक्तं; T_1 G_4 संप्रवृत्ते (for संप्रसक्ते). D_1 नृवीरः; S तु (G_2 [ऽ]ति-; M_3 हि) वीरे; Cc नृवीरम्. K_4 Da Dn_1 D_5 महाहवे यत्तदा संप्रयुक्तं; B_{2-4} Dn_2 $D_{4.6-8}$ °वे पश्य युक्तं नृवीरं; D_3 °वे संप्रसमीक्ष्य वीर. —^{c}) K_1 om. (hapl.) from प्रथितः in 23^{c} to 24^{c}. T G_4 भीष्मव्यथितः; $G_{1.3}$ भीष्मे व्यथितः; G_2 भीष्मस्य भयं; M भीष्माद्व्यथितः (M_4 °तं) (for भीष्मात्प्रथितः). —^{d}) G_2 भूयस् (for भयं). G_3 त्वमस्य; M_2 तदद्य (for त्वमद्य). D_1 चैव (for वीर).

24 K_1 om. 24^{abc} (cf. v. l. 23). —^{b}) $K_{0.2}$ विललापानुबंधं; K_4 B Da Dn $D_{4.5.7.8}$ Cc विप्र(D_3 प्रवि)लापापविद्धं; D_1 T_1 G_4 विप्रलापानुबंधं (D_1 °विद्धं); D_6 चित्रपदानुबंधं; M विप्रलापावबद्धं.

25 ^{a}) K_0 तमातपंतं. Dn_2 हि महाजवेन; D_2 T G M_4 सहसा जवेन (G_3 °सार्जुनेन) (for महता जवेन). —^{b}) $D_{1.3}$ शिखंडिनं भीष्ममथो समीक्ष्य; S °नं भीष्मरथं तदानीं. — D_3 om. 25^{cd}. —^{c}) K_2 Dn $D_{4.5.8}$ अवारयामास; $K_{3.5}$ $B_{3.4}$ $D_{2.6}$ निवारयामास. K_3 शल्यम्. T_2 M एव; G_{1-3} एवम् (for एनं). —^{d}) K $B_{3.4}$ $D_{1.2.4.6.8}$ T_1 G अस्त्रेण; M चास्त्रेण (for शस्त्रेण). D_1 तीव्रेण (for घोरेण). K_{0-2} हि दुर्जयेन; D_4 (before corr.) सुदुष्करेण (for सुदुर्जयेन).

26 D_3 *repeats* 26^{ab} after 26. —^{a}) K_0 सखापि दृष्ट्वा; $D_{1.3}$ आग्नेयमस्त्रं; D_3 (second time) सेनापि दृष्ट्वा; T_1 G स चापपृष्ठात् (for स चापि दृष्ट्वा). D_3 (second time) तमुदीर्यमाणम्. —^{b}) $D_{1.3}$ दृष्ट्वा (for अस्त्रं). B Da Dn $D_{1.3-7.8}$ (first time) S °समप्रकाशं; D_3 (second time) °समानकल्पं (for समप्रभावम्). — K_5 om. (hapl.) 26^{cd}. —^{c}) K_2 नासौ विमुह्य; K_3 D_6 न संमुमोह; B_{1-3} Da Dn $D_{5.7}$ T_2 M नासंप्रमुह्य; B_4 न संमुमुह्य; $D_{1.3}$ तत्संप्रधा(D_3 °चा)र्य; $D_{2.4.8}$ नासंप्रमुह्यद्; T_1 G_4 नाकंपताथ; $G_{1.3}$ नासंप्रसह्य; G_2 नाकं प्रसह्य (for नासौ व्यमुह्यद्). — D_3 om. 26^{d}–27^{a}. —^{d}) K_4 नासौ; S वीरो (for राजन्). D_2 महेंद्रसदृशप्रभावः; D_3 (*sup. lin.* as in text). S °प्रतिमप्रकाशः. — After 26, D_3 *repeats* (with v. l.) 26^{ab}.

27 D_3 om. 27^{a} (cf. v. l. 26). —^{a}) D_2 तथैव

शिखण्ड्यथोग्रं प्रतिघाताय तस्य ।
तदस्त्रमस्त्रेण विदार्यमाणं
खस्थाः सुरा ददृशुः पार्थिवाश्च ॥ २७
भीष्मस्तु राजन्समरे महात्मा
धनुः सुचित्रं ध्वजमेव चापि ।
छित्त्वानदत्पाण्डुसुतस्य वीरो
युधिष्ठिरस्याजमीढस्य राज्ञः ॥ २८
ततः समुत्सृज्य धनुः सबाणं
युधिष्ठिरं वीक्ष्य भयाभिभूतम् ।
गदां प्रगृह्याभिपपात संख्ये
जयद्रथं भीमसेनः पदातिः ॥ २९
तमापतन्तं महता जवेन
जयद्रथः सगदं भीमसेनम् ।
विव्याध घोरैर्यमदण्डकल्पैः
शितैः शरैः पञ्चशतैः समन्तात् ॥ ३०
अचिन्तयित्वा स शरांस्तरस्वी
वृकोदरः क्रोधपरीतचेताः ।
जघान वाहान्समरे समस्ता-
नारट्टजान्सिन्धुराजस्य संख्ये ॥ ३१
ततोऽभिवीक्ष्याप्रतिमप्रभाव-

C. 6. 3764
B. 6. 85. 34
K. 6. 85. 34

(for तन्नैव). — b) K1 शरे; D6 शरौस् (for शरैस्). K0. 2 तमस्त्रं; Dn2 D4 तदास्त्रं (for तदस्त्रं). T1 G4 परिबाधमानः; G1. 3 प्रतियोधमानः. — c) K0–2 अथादधे. Ś1 वरुणम्; K0–2 वारणम्. T1 G1. 3. 4 अस्त्रमन्यत् (by transp.); T2 अस्त्रवेगं; G2 अस्त्रमन्यं (for अन्यदस्त्रं). — d) B Da Dn D4–8 उग्रं शिखंडी; D3 शिखंडिरुग्रं (for शिखण्ड्यथोग्रं). K4 B Da Dn D4–8 प्रतिघातमस्य; D1. 2 °घातनाय (for °घाताय तस्य). K5 शिखंडिनोग्रं प्रतिथात्मनस्य; T1 G M मुख्यं (G1. 3 M4 उग्रं; M1 अङ्ग्यं; M1 [*sup. lin.*]. 3 अन्यं; M2 ततः; M5 अस्त्रं) शिखंडी च वधाय तस्य; T2 शिखंडी च वीरो हि वधाय तस्य. — e) K0. 1. 3. 5 Dn2 D1–3. 6. 8 M2. 5 निवार्यमाणं; K2 B2 D4. 7 M1. 3. 4 निदार्यमाणं. — f) D2 स्वःस्थाः (for खस्थाः). K3 पुरा (for सुरा). K5 स्वच्छाप्सरो (for खस्थाः सुरा). M4 चारणाश्च (for पार्थिवाश्च).

28 b) K3 B3. 4 D1. 2. 4. 6 च चित्रं; K4 B1 Dn2 D7. 8 सचित्रं; B2 सचित्र-; T2 G2. 3 सुचित्र- (for सुचित्रं). D1 ध्वजमेकेन तस्य (for ध्वजमेव चापि). D8 चापि; T2 चाशु (for चापि). — c) T2 M4 भित्वा; M1. 3. 5 हित्वा (for छित्त्वा). D8 M (except M2) नदन् (for [अ]नदत्). D1 पांडुपुत्रस्य (for °सुतस्य). — d) D2 (before corr.) युधिष्ठिरस्याथ तदा बलिष्ठः.

29 a) K5 D2 (before corr. as in text) समुच्छिद्य (for °त्सृज्य). D6 सबाणे. — b) K5 भीष्म-; D1 प्रेक्ष्य (for वीक्ष्य). D1 तथाभिभूतं (for भयाभि°). — c) K0–3 गृहीत्वा (for प्रगृह्य). Da Dn D4. 5. 8 S [अ]थ (for [अ]भि-). K1 om. from संख्ये in 29^{c} up to विव्याध in 30^{c}. T2 G1–3 M संखे. — d) T1 G प्रतापी (for पदातिः). K3. 5 D2 जयद्रथं सहसा भीमसेनः; Cv as in text.

30 K1 om. up to विव्याध in 30^{c} (cf. v. l. 29). K5 reads 30^{ab} twice. — a) K0 तमातपंतं. Ś1 K0. 2. 3. 5 (both times) D1. 2 सहसा (for महता). — b) T1 G संगतं; T2 सहसा (for सगदं). K5 (both times) जयद्रथं सहसा भीमसेनः. — d) D1 सितैः (for शितैः). K1 शिरैः (for शरैः). B1–3 Da Dn D4. 5. 7 वै नवभिः; D1 सप्तशतैः; D6 पंचदशैः (for पञ्चशतैः). K2 समस्तात्. K1. 3. 5 शिलाशितैस्तत्र (K5 °तैः सूत्र-) शरैः समंतात्; D8 शितैः शरौघैर्नवभिः समंतात्.

31 a) K3. 5 D2 अचिंतयानः. T1 G4 तु (for स). K3 D1. 6 शरास् (for शरांस्). — b) K5 D2 T1 G कोप° (for क्रोध°). — c) M2 बाणान् (for वाहान्). K3. 5 D2. 6 त्वरितः (for समरे). Ś1 समस्तं; K4 B D2 M1. 3. 5 समंताद्; D1 महारथो (for समस्तान्). — Ś1 *repeats* 31^{d}–32^{b} after 32^{c}. — d) K1 आरंघजान्; K2 पाराशतां; K4 B Dn2 D2 (before corr). 6 पा(D6 प)रावतान्; K5 व्यरोजवान्; Da D5 नानायुजान्; Dn1 वनायुजान्; D1 आरट्टजान्; D2 (marg. *sec. m.*) मनोजवान्; D3 आराट्ट(before corr. °ट्टि)जान्; D4. 7 पाराशजान्; D8 पाराशरान्; T1 G4 वृकोदरः; T2 स संमतान्; G1–3 सुसंमतान्; M1–3. 5 स सध्वजान् (for आरट्टजान्). G1. 3 M संखे; G2 संवे (for संख्ये). Ś1 (both times) तथा ध्वजान्सिंधुराजसंख्ये.

32 a) K2 विभीक्ष्य (for ऽभिवीक्ष्य). M (except M4) °प्रतापस् (for °प्रभावस्). — c) Ś1 अभ्युद्ययौ;

C. 6. 3794
B. 6. 85. 34
K. 6. 85. 34

स्तवात्मजस्त्वरमाणो रथेन ।
अभ्याययौ भीमसेनं निहन्तुं
समुद्यतास्त्रः सुरराजकल्पः ॥ ३२
भीमोऽप्यथैनं सहसा विनद्य
प्रत्युद्ययौ गदया तर्जमानः ।
समुद्यतां तां यमदण्डकल्पां
दृष्ट्वा गदां ते कुरवः समन्तात् ॥ ३३
विहाय सर्वे तव पुत्रमुग्रं
पातं गदायाः परिहर्तुकामाः ।
अपक्रान्तास्तुमुले संविमर्दे
सुदारुणे भारत मोहनीये ॥ ३४
अमूढचेतास्त्वथ चित्रसेनो
महागदामापतन्तीं निरीक्ष्य ।
रथं समुत्सृज्य पदातिराजौ
प्रगृह्य खड्गं विमलं च चर्म ।
अवप्लुतः सिंह इवाचलाग्रा-
ज्जगाम चान्यं भुवि भूमिदेशम् ॥ ३५
गदापि सा प्राप्य रथं सुचित्रं
साश्वं ससूतं विनिहत्य संख्ये ।
जगाम भूमिं ज्वलिता महोल्का
भ्रष्टाम्बराद्गामिव संपतन्ती ॥ ३६
आश्चर्यभूतं सुमहत्त्वदीया

D_5 अभ्याययुर्. Ś$_1$ K_0 (*sup. lin.*). $_2$ नियंतुं; K_1 विधत्तं; D_8 विहंतुं (for निहन्तुं). — After 32^c, Ś$_1$ *repeats* 31^d–32^b. — ^{d}) Da D_1 समुद्यतास्त्रं; D_2 समुत्थितास्त्रः. Da $D_{1, 3, 5}$ सुरराजकल्पं. — After 32, D_1 T G $M_{1, 2}$ ins. :

331* जयद्रथो भग्नवाहं रथं तं
त्यक्त्वा ययौ यत्र राजा कुरूणाम् ।
भयेन भीमस्य स मूढचेताः
ससौबलस्तत्र युद्धस्य भीतः ।

[(L. 1) M_3 भग्नवाहो. G_2 च (for तं). — (L. 3) T_3 मूढस्य (for भीमस्य). D_1 भयात्समीपस्य तु मूढचेताः. — (L. 4) D_1 ययौ स्खलन्हृष्टरोमास्त्रभीतः.]

33 ^{a}) D_1 [ऽ]पि नादं (for ऽप्यथैनं). — ^{b}) G_2 सहसा; M समरे (for गदया). K_6 D_2 M (except M_4) तं जघान; D_1 राजमानः; D_5 गर्जमानः; $D_{6, 8}$ तर्जयानः; T_1 G हंतुकामः (for तर्जमानः). — ^{d}) T_2 तदा (for गदां). D_1 सुभीताः; D_6 समेताः (for समन्तात्).

34 ^{a}) $B_{3, 4}$ Da Dn $D_{4, 5, 7, 8}$ T G M_2 पुत्रमुग्रां; D_1 राजपुत्राः (for पुत्रमुग्रं). D_3 विहाय जग्मुस्तव पुत्राश्च सर्वे. — ^{b}) K_4 Da Dn $D_{4, 5, 7, 8}$ भैमीं गदां तां (Da Dn_1 D_5 ते); S गतिं गदायाः (T_2 G_1 °तायाः) (for पातं गदायाः). $K_{0, 2}$ G_2 परिहंतुकामाः; K_3 °हर्तुकामः. — ^{c}) Ś$_1$ M अपाक्रांतास्; K_5 व्यप°; D_8 उपक्रांते (for अपक्रान्तास्). K_3 तुमलं; K_5 $D_{2, 3}$ तुमले. $K_{3, 6}$ $B_{1, 3, 4}$ Da Dn_1 $D_{2, 3, 5, 6}$ M संप्रमर्दे; T_1 G संप्रहारे (G_2 °रैः); T_2 संप्रवृत्ते; Cc संप्रसृद्यन् (for संविमर्दे). D_1 मुमोच तामाकुलसंप्रमर्दे. — ^{d}) K_2 स्व- (for सु-).

35 ^{a}) G_2 आमूढ°; M_3 विमूढ°. — ^{b}) T G M_4 तदा (T_3 तां वै; $G_{1, 3}$ तथा; M_4 ततो) गदाम्; $M_{1-3, 5}$ चित्रां गदाम् (for महागदाम्). $K_{2, 3}$ $D_{1, 6}$ आपततीं. T G समीक्ष्य (for निरीक्ष्य). — ^{c}) T_1 $G_{2, 4}$ रथाद् (for रथं). T_1 G_4 समुत्पत्य; G_{1-3} °त्क्षिप्य (for °त्सृज्य). K_0 पदातिमाजौ. — ^{d}) K_{3-5} B D (except D_{1-3}) T_1 $G_{3, 4}$ M_{1-3} विपुलं (for विमलं). — ^{e}) T_3 अथाप्लुतः; $M_{2, 4}$ अवाप्लुतः. — ^{f}) K_4 B जगामान्यं भूमिप भूमिदेशं; Da Dn $D_{4, 5, 7, 8}$ जगाम तं भूमिप भूमिदेशं; D_1 T_3 जगाम पद्भ्यां भुवि भूमिदेशं.

36 ^{a}) D_1 तु (for [अ]पि). K_5 Da_2 $D_{1, 5}$ M सं- (for सा). T_1 G तस्य (for प्राप्य). K_{0-2} T_1 G_4 विचित्रं; G_2 सचित्रं; M ससूतं. Ś$_1$ गदामिमां प्राप्य रथीं विचित्रं. — ^{b}) $M_{1-3, 5}$ साश्वं सकेतुं; M_4 भीमेन मुक्ता (for साश्वं ससूतं). T_3 $G_{1, 3}$ M संखे; G_3 संघे. — ^{c}) D_6 ज्वलितां; T_3 ज्वलितं. Da_1 महोल्कया; D_6 G_2 महोल्कां. — ^{d}) K_3 भ्रष्टा स्वराद्गामिव; D_3 भ्रष्टांगरागामिव; T_3 हृष्टांवराद्गामिव. B_4 Da Dn D_{4-8} संचरंती ($D_{6, 8}$ °तीं); D_8 संपतंतीं; T_1 $G_{2, 4}$ निष्पतंती (G_2 °तीं). D_1 च्युतांबराद्भूमिमिवापतंती.

37 ^{a}) K_0 lacuna; K_2 B_{2-4} Dn_2 $D_{4, 7, 8}$ आश्चर्यरूपं; T_2 °भूमिं (for °भूतं). K_3 त्वदीयो. — ^{b}) K_8 $D_{2, 3}$ तं; K_4 तां; D_6 ते (for तद्). $D_{4, 8}$

दृष्ट्वैव तद्भारत संप्रहृष्टाः ।
सर्वे विनेदुः सहिताः समन्ता-
त्पुपूजिरे तव पुत्रं ससैन्याः ॥ ३७

इति श्रीमहाभारते भीष्मपर्वणि एकाशीतितमोऽध्यायः ॥ ८१ ॥

८२

संजय उवाच ।
विरथं तं समासाद्य चित्रसेनं मनस्विनम् ।
रथमारोपयामास विकर्णस्तनयस्तव ॥ १
तस्मिंस्तथा वर्तमाने तुमुले संकुले भृशम् ।
भीष्मः शांतनवस्तूर्णं युधिष्ठिरमुपाद्रवत् ॥ २
ततः सरथनागाश्वाः समकम्पन्त सृञ्जयाः ।
मृत्योरास्यमनुप्राप्तं मेनिरे च युधिष्ठिरम् ॥ ३
युधिष्ठिरोऽपि कौरव्यो यमाभ्यां सहितः प्रभुः ।
महेष्वासं नरव्याघ्रं भीष्मं शांतनवं ययौ ॥ ४
ततः शरसहस्राणि प्रमुञ्चन्पाण्डवो युधि ।
भीष्मं संछादयामास यथा मेघो दिवाकरम् ॥ ५
तेन सम्यक्प्रणीतानि शरजालानि भारत ।
प्रतिजग्राह गाङ्गेयः शतशोऽथ सहस्रशः ॥ ६
तथैव शरजालानि भीष्मेणास्तानि मारिष । C. 6. 3797 B. 6. 86. 7 K. 6. 86. 7

भ्रातरः संप्रहृष्टाः; D7 भ्रातुरसं° (for भारत संप्र°). — c) Ś1 विभेदुः (for विनेदुः). D1 सहसा (for सहिताः). — d) K0-3 Dn D3. 7. 8 प्रपूजिरे; D5. 6 सुपूजिरे (D6 °ते); T2 अपूजिरे (for पुपूजिरे). K3. 5 D2. 6 पुत्रस्य शौर्यं; K4 पुत्रं ससैन्यं; B1. 2 Da Dn1 D5 M4 पुत्रं च सैन्याः; T G पुत्रस्य योधाः (for पुत्रं ससैन्याः). M1-3. 5 संपूजयंतस्त्वथ चित्रसेनं.

Colophon om. in Ś1. — *Sub-parvan:* Omitting sub-parvan name, K0-2 D6 mention only सप्तमयुद्धदिवसे (D6 °दिवसयुद्धे); K3 सप्तमेहनि; K4 Da Dn1 सप्तमेह्नि; M4 सप्तमेह्निके. — *Adhy. name:* T2 G2 M1. 2 संकुलयुद्धं. — *Adhy. no.* (figures, words or both): K5 77; Da2 (*sec. m.*) 43; Dn2 M5 83; D6 T1 G 80; T2 M3. 4 82; M1. 2 81 (as in text). —*Śloka no.:* Dn1 42; Dn2 D5. 6 40.

82

1 a) K4 B Da Dn D4. 5. 7. 8 तु; T2 स (for तं). D1 समालोक्य (for °साद्य). — b) K3. 5 D2 यशस्विनं; D3. 6 S महारथं (for मनस्विनम्). — d) G2 विकीर्णस.

2 a) T2 तदा (for तथा). — b) K3. 5 D2. 3. 6 तुमले. K5 D2 भृशसंकुले (for संकुले भृशम्). — c) K3. 5 D2 राजन् (for तूर्णं).

3 b) Da1 Dn1 (before corr.) D4. 6. 8 समकंपत (for °कम्पन्त). — c) D4 मृत्योरास्यमुखप्राप्तं. — d) K5 [s]थ; D2 तं (for च).

4 a) B4 T2 कौरव्य. — c) K1 महेष्वासो. — d) D2 भीष्मः.

5 b) Da1 प्रमुचन्; D1 विमुंचन्; D2 M1 प्रमुंचत्; M2 प्रामुंचत्. — c) K1 स च्छादयामास; K3. 5 D2 प्रच्छाद°; D1 प्रत्साद° (for संछाद°). K3 मेघो यद्वद् (for यथा मेघो).

6 a) G2 प्रभूतानि (for प्रणीतानि). — b) B2 तानि शस्त्राणि (for शरजालानि). Ś1 D3. 7 T1 G M4 मारिष; K B3. 4 Dn2 D2. 4. 6. 8 भागशः; B1 Da Dn1 D5 सर्वशः (for भारत). — c) D3 तानि (for प्रति-). M (except M4) गांगेयः प्रतिजग्राह. — D2 om. 6d–8a.

7 D2 om. 7 (cf. v. l. 6). — b) G2. 3 भीष्मेणाखाणि (for °णास्तानि). K4 सर्वशः; D1 भागशः; T G3-4 भारत (for मारिष). Cv as in text. — Ś1

C. 6. 3787
B. 6. 86. 7
K. 6. 86. 7

आकाशे समदृश्यन्त खगमानां व्रजा इव ॥ ७
निमेषार्धाच्च कौन्तेयं भीष्मः शांतनवो युधि ।
अदृश्यं समरे चक्रे शरजालेन भागशः ॥ ८
ततो युधिष्ठिरो राजा कौरव्यस्य महात्मनः ।
नाराचं प्रेषयामास क्रुद्ध आशीविषोपमम् ॥ ९
असंप्राप्तं ततस्तं तु क्षुरप्रेण महारथः ।
चिच्छेद समरे राजन्भीष्मस्तस्य धनुश्च्युतम् ॥ १०
तं तु छित्त्वा रणे भीष्मो नाराचं कालसंमितम् ।
निजघ्ने कौरवेन्द्रस्य हयान्काञ्चनभूषणान् ॥ ११
हताश्वं तु रथं त्यक्त्वा धर्मपुत्रो युधिष्ठिरः ।
आरुरोह रथं तूर्णं नकुलस्य महात्मनः ॥ १२
यमावपि सुसंक्रुद्धः समासाद्य रणे तदा ।
शरैः संछादयामास भीष्मः परपुरंजयः ॥ १३
तौ तु दृष्ट्वा महाराज भीष्मबाणप्रपीडितौ ।
जगामाथ परां चिन्तां भीष्मस्य वधकाङ्क्षया ॥ १४
ततो युधिष्ठिरो वश्यान्राज्ञस्तान्समचोदयत् ।
भीष्मं शांतनवं सर्वे निहतेति सुहृद्गणान् ॥ १५
ततस्ते पार्थिवाः सर्वे श्रुत्वा पार्थस्य भाषितम् ।

---

om. 7^c–8^b. — ^c) K3 Da1 T2 °दृश्यंते. — ^d) K1 खगमानं; Dn1 (before corr. as in text) शलभानां; G2 खादमानां (G2 °नाः). T2 G2 प्रजा (for व्रजा). B3 D6 व्रजमानाः खगा इव; D1 शलभानामिव व्रजाः; D3 मेघा इव नभस्तले.

8 Ś1 om. 8^ab (cf. v. l. 7); D2 om. 8^a (cf. v. l. 6). — ^a) K0. 1 निमेषार्धात्तु; K3. 5 निमेषार्धेन. K3 कौंतेय. — ^d) Ś1 रथजालेन; K3. 5 D2 शरवर्षेण (for °जालेन). K3 भूदिशः; K4 B1 Da Dn D5 S भारत; D1. 3 मारिष (for भागशः).

9 ^a) D1 T2 राजन् (for राजा). — ^b) K1 कौरस्य च (sic); G3 कौंतेयस्य (for कौरव्यस्य). — ^c) S नाराचान् (for नाराचं). D1 प्रेषयामास नाराचं. — ^d) B3 क्रुद्धम्. D1 समरे वह्निसंनिभं; S क्रुद्धो ह्याशीविषोपमान्.

10 ^a) K0 ततस्तौ तु; K4 B1–3 Dn2 D4. 7. 8 तु तं तत्र; K5 D2 क्षुरप्रेण (for ततस्तं तु). Ś1 ते तु; K1 तां तु; B4 तत्र; Da Dn1 D5 तूर्णं (for तं तु). S असंप्राप्तांस्ततस्तांस्तु. — ^b) S महायशाः (for °रथः). K5 D2 भीष्मः शांतनवो युधि. — ^c) S भीष्मः (for राजन्). — ^d) K5 ततस्; D2 सुतस् (for भीष्मस्). D3 धनुच्युतं. S पांडवस्य धनुश्च्युतान्.

11 ^a) S तांस् (for तं). Da Dn1 (m as in text) D3. 5 हित्वा; M1 जित्वा (छित्त्वा). — ^b) K4. 5 B2–4 Da Dn1 D1. 2. 5. 6 कालसंनिभं (for °संमितम्). S नाराचान्कालसंमितान् (T2 M4 °संनिभान्). — ^c) Da3 निजघ्नन्. M (except M4) कौरवेयस्य (for °वेन्द्रस्य). — ^d) T1 G2. 4 कनकभूषणान्. — After 11, S ins.:

332* हताश्वे तु रथे तिष्ठञ्शक्तिं चिक्षेप धर्मराट् ।
तामापतन्तीं सहसा कालपाशोपमां शिताम् ।
चिच्छेद समरे भीष्मः शरैः संनतपर्वभिः ।

[(L. 2) M (except M4) समरे (for सहसा). G3 M1 (also as above) कालदंडोपमां. T2 सितां (for शिताम्). — (L. 3) M5 चिक्षेप (for चिच्छेद).]

12 ^a) K1 हत्वाश्वं; T2 हताश्वस् (for हताश्वं). — ^b) S धर्मराजो (for °पुत्रो).

13 ^a) K3. 5 B1 D2 G1 हि संक्रुद्धः (B1 °द्धौ); K4 रणे क्रुद्धः; B2–4 Da Dn1 D6 T2 सुसंक्रुद्धौ; Dn2 D1. 4. 6–8 च संक्रुद्धौ (D6 °द्धः). — K0–2 om. 13^bc. — ^b) D1 परिवार्य (for समासाद्य). T1 G4 तथा (for तदा). — ^c) K5 D2 स च्छा(K5 संछा)दयामास रणे; D1 छादयेतां शरैस्तीक्ष्णैर्. — ^d) D5 भीष्मं. D1 भीष्मं शांतनवं रणे. — After 13, D1 ins.:

333* भीष्मोऽपि रथिनां श्रेष्ठो विव्याध निशितैः शरैः ।
भ्रातरौ तौ महावीर्यौ शत्रुसैन्यभयंकरौ ।

14 ^b) Ś1 °प्रबाधितौ; G1. 3 °प्रपीडितः. — ^c) K3 D2. 4 परमां (for [अ]थ परां). — ^d) S भीष्मं प्रति युधिष्ठिरः.

15 ^a) S धर्मात्मजो (for युधिष्ठिरो). K2 वाच्यान्; K3. 5 D1. 2 राजा; Dn1 (before corr. as in text) मत्स्यान्; D5 वत्सान्; T2 G1. 3 [s]पश्यंस्; M1 पश्य; M2 पश्यंस् (for वश्यान्). — ^b) S तान्राज्ञः (by transp.). Ś1 समदर्शयन्; K3. 5 D2. 6 °नोदयत्; K1 °देशयत्; D8 G1. 2 M5 °चोदयन्. D1 सुहृद्राज्ञोन्वचोदयत्. — ^c) G1. 2 भीष्मः. B Da Dn1 D4. 5. 7. 8 T1 G4 संख्ये; G1–3 संखे (for सर्वे). — ^d) K0–2

महता रथवंशेन परिवव्रुः पितामहम् ॥ १६
स समन्तात्परिवृतः पिता देवव्रतस्तव ।
चिक्रीड धनुषा राजन्पातयानो महारथान् ॥ १७
तं चरन्तं रणे पार्था ददृशुः कौरवं युधि ।
मृगमध्यं प्रविश्येव यथा सिंहशिशुं वने ॥ १८
तर्जयानं रणे शूरांस्त्रासयानं च सायकैः ।
दृष्ट्वा त्रेसुर्महाराज सिंहं मृगगणा इव ॥ १९
रणे भरतसिंहस्य ददृशुः क्षत्रिया गतिम् ।
अग्नेर्वायुसहायस्य यथा कक्षं दिधक्षतः ॥ २०
शिरांसि रथिनां भीष्मः पातयामास संयुगे ।
तालेभ्य इव पक्वानि फलानि कुशलो नरः ॥ २१
पतद्भिश्च महाराज शिरोभिर्धरणीतले ।
बभूव तुमुलः शब्दः पततामश्मनामिव ॥ २२
तस्मिंस्तु तुमुले युद्धे वर्तमाने सुदारुणे ।
सर्वेषामेव सैन्यानामासीद्व्यतिकरो महान् ॥ २३
भिन्नेषु तेषु व्यूहेषु क्षत्रिया इतरेतरम् ।
एकमेकं समाहूय युद्धायैवोपतस्थिरे ॥ २४
शिखण्डी तु समासाद्य भरतानां पितामहम् ।
अभिदुद्राव वेगेन तिष्ठ तिष्ठेति चाब्रवीत् ॥ २५
अनादृत्य ततो भीष्मस्तं शिखण्डिनमाहवे । C. 6. 3616 B. 6. 86. 26 K. 6. 86. 26

निहन्मेति; K5 D3 T1 G निघ्नतेति; D1 निहंतेति (for निहतेति). Da1 सुदारुणात्; T1 G सुहृद्रणं. Ś1 निहनध्वं सुहृद्रणात्; T2 M1. 3–5 निहन्म ससुहृद्रणं; M2 विहन्म ससुहृद्रणः.

16 ^{b}) Dn D4. 7. 8 पार्थिव-; T1 G तस्य प्र- (for पार्थस्य). K1 भारतं (for भाषितम्).

17 ^{a}) T1 G2. 4 आ समंतात् (for स समन्तात्). K5 परिव्रातः; D2 परिविवृतः (hypermetric) (for परिवृतः). — ^{c}) K5 D6. 8 चि(D8 वि)क्रीडे. — ^{d}) Ś1 (*sup. lin.* as in text) महारथं; M1 °रथात्. D1 पोथयन्वै रथोत्तमान्.

18 ^{a}) Da1 चरंत. K5 पार्थान्; D1 पार्थ. — ^{b}) T1 G4 कौरवा. K3 तथा; K4 रणे; K5 D1. 2 तदा (for युधि). — ^{c}) Ko. 1 D1. 2 मृगमध्ये (for °मध्यं). Ko. 2 D2 G2. 3 M (except M5) प्रविश्यैव; Da1 प्रविविशे; D1 हि संप्राप्तं; T2 प्रविश्ये च (for प्रविश्येव). — ^{d}) K3. 5 D2. 3 T2 सिंहशिशुर्; B1. 2 Da2 Dn1 D1. 4–7 सिंहं महा-; B3 सिंहो महा-; Da1 Dn2 D8 सिंहमहा- (for सिंहशिशुं). B4 यथा सिंहं महारणे.

19 ^{a}) Ś1 तर्जयंत; Da1 तर्जयानां; D1 गर्जमानं. K1 शूरास्; K3 D1. 3 शूरं; D6 वीरांस् (for शूरांस्). — ^{b}) D1 त्रासयंतं च सैनिकान्. — ^{c}) K1 Da1 त्रैसुर्; K3 नेशुर् (for त्रेसुर्). D1 परं राजन् (for महाराज). K5 दृष्ट्वाग्रे सुमहाराज. — ^{d}) S (except M1) यथा (for इव).

20 ^{a}) K3. 5 B1 Da1 Dn1 D1. 2. 3 भारतसिंहस्य. D8 S तस्य (D3 रणे; T2 M तत्र) भारत भीष्मस्य. — ^{c}) D3 T2 वायुः (for वायु-). — ^{d}) T2 काष्टं; G1–3 M3. 5 काष्ठान्; M1 काष्ठा (for कक्षं). K5 D3 दिधिक्षतः (for °धक्षतः). M2 यथा काष्ठानि पक्षतः.

21 ^{a}) S श्रेष्ठः (for भीष्मः). — Ko. 2 om. (? hapl.) 21^{b}–22^{c}. — ^{c}) Ś1 बलेभ्य (for तालेभ्य). D1. 3 परि- (for इव). — ^{d}) D1 फलानीव मधूकराः; D2 फलानि च महीतले; D3 फलानीव महानिलः.

22 Ko. 2 om. 23^{abc} (cf. v. l. 21). — ^{a}) S ततो राजन् (for महाराज). — ^{b}) K3 D2. 3 धरणीतलं; T1 G च महीतले. — ^{c}) K3. 5 Da1 D2. 3. 5. 6 तुमलः. — ^{d}) Da1 अश्मना.

23 ^{a}) K3–5 B Da Dn D4–8 T1 G4 M (except M4) सुतुमु(K3. 5 Da1 D5 °म)ले (for तु तुमुले). — ^{b}) K3. 5 B Da Dn D3–8 भयानके; D2 S भयावहे (for सुदारुणे).

24 ^{a}) D5 अभिन्ने; T1 G2. 4 भग्नेषु (for भिन्नेषु). Ko–2 तेन (for तेषु). K5 व्यूढेषु. — ^{b}) K5 D3 चेतरे° (for इतरे°). — ^{c}) K1. 4 D1 G2 M3. 5 एक एकं; K5 Da Dn1 (before corr.) D5 एकमेवं; M1 एकयेकान्; M2 एक एकान् (for एकमेकं). D3 समासाद्य (for °हूय). — ^{d}) K3. 5 D2 युद्धायैके प्रतस्थिरे; B Dn1 युद्धायैवावतस्थिरे.

25 ^{a}) S समाहूय (for °साद्य). — ^{b}) K3. 5 D3 T1 G2. 4 M1 भारतानां. — ^{d}) T1 G2. 4 सोब्रवीत् (for चाब्र°).

26 ^{a}) D5 अनाहृत्य. — ^{b}) K5 D2 स (for तं).

C. 6. 3816
B. 6. 85. 26
K. 6. 86. 25

प्रययौ सृञ्जयान्क्रुद्धः स्त्रीत्वं चिन्त्य शिखण्डिनः ॥ २६
सृञ्जयास्तु ततो हृष्टा दृष्ट्वा भीष्मं महारथम् ।
सिंहनादान्बहुविधांश्चक्रुः शङ्खविमिश्रितान् ॥ २७
ततः प्रववृते युद्धं व्यतिषक्तरथद्विपम् ।
अपरां दिशमास्थाय स्थिते सवितरि प्रभो ॥ २८
धृष्टद्युम्नोऽथ पाञ्चाल्यः सात्यकिश्च महारथः ।
पीडयन्तौ भृशं सैन्यं शक्तितोमरवृष्टिभिः ।
शस्त्रैश्च बहुभी राजञ्जघ्नतुस्तावकान्रणे ॥ २९
ते हन्यमानाः समरे तावकाः पुरुषर्षभ ।
आर्यां युद्धे मतिं कृत्वा न त्यजन्ति स्म संयुगम् ।
यथोत्साहं च समरे जघ्नुर्लोकं महारथाः ॥ ३०
तत्राक्रन्दो महानासीत्तावकानां महात्मनाम् ।
वध्यतां समरे राजन्पार्षतेन महात्मना ॥ ३१
तं श्रुत्वा निनदं घोरं तावकानां महारथौ ।
विन्दानुविन्दावावन्त्यौ पार्षतं प्रत्युपस्थितौ ॥ ३२
तौ तस्य तुरगान्हत्वा त्वरमाणौ महारथौ ।
छादयामासतुरुभौ शरवर्षेण पार्षतम् ॥ ३३
अवप्लुत्याथ पाञ्चाल्यो रथात्तूर्णं महाबलः ।

— K2 om. 26^{c}–27^{b}. — c) Ko. 1 भीष्मः (for क्रुद्धः). — d) T2 चात्र (for चिन्त्य). T1 G स्त्रीत्वं तस्य विचिंतयन्.

27 K2 om. 27^{ab} (cf. v. l. 26). — a) Ś1 K (K2 om.) D1. 2 M4 च (for तु). K4. 5 B1. 3. 4 Dn2 D1. 2 T G दृष्ट्वा; B2 हृष्टो; M (except M4) युद्धे (for हृष्टा). — b) K4 B1 Dn2 D2 हृष्टं; K5 घृष्टं; B2. 3 T G भीष्मं; B4 D1 हृष्टा (for दृष्ट्वा). B2 दृष्ट्वा; B3 प्रति-; T G युद्धे (for भीष्मं). Ś1 Ko. 1. 4 महाहवे; K3. 5 B1 D2. 3. 6 महारणे; D1 व्यवस्थितं (for महारथम्). — c) K3. 5 Da1 Dn1 D2. 6 च विविधांश् (for बहुविधांश्). T1 G सिंहनादं बहुविधं. — d) K5 D8 सिंहविमिश्रितान्; T1 G शंखविमिश्रितं. D1 M विनेदुः शंखमिश्रितान्.

28 b) D2 अभिषक्तरथद्विपं; G3 M2. 4. 5 व्यतिषिक्त°. — c) B2–4 D3 पश्चिमां; Cc अपरां (as in text). Ko. 2 Da1 D2. 5 दिशिमास्थाय; K3 B दिशमासाद्य; D1 दिशमाश्रित्य; T2 जितमास्थाय; M2 निशमा°.

29 a) T2 धृष्टद्युम्नस्तु; M3 °द्युम्नेन. Ś1 पंचाल्यः; T1 G2–4 पांचालः. — b) Ś1 सात्यकिं. — c) K1 पीडयतो; K2. 3 Dn G1–3 °यंतो; Da D5 °यंतं; T2 °यंते; M2 °यानो. — d) Ko °ऋष्टिभिः; Da1 °दृष्टिभिः; D1 °सायकैः; T1 G2. 4 °यष्टिभिः. — e) Ko. 2 शरैश्च (for शस्त्रैश्च). K3 बहुली (for बहुभी). B3 वीरौ (for राजन्). K4 B1. 2. 4 Da Dn D4–8 शस्त्रै- (Dn2 °रै)र्बहुविधै राजन्; D1 अस्त्रैश्च बहुभिस्तीक्ष्णैर्; S (except M4) अस्त्रैश्च बहुले राजन्. — f) Da Dn D4. 5. 7 आजघ्नुस्; D1 निजघ्नुस्; D8 राजयुस्; T2 M (except M4) निघ्नतस्; G1. 3 निघ्नतुस् (for जघ्नतुस्).

30 D2 reads 30 after 32^{ab}. — a) K1 ते हन्यमानः; K2 निहन्यमानः; D1 ते वध्यमानः. T G2. 4 M (except M4) संग्रामे (for समरे). — b) K3. 5 D2. 6 S भरतर्षभ; B2–4 पुरुषर्षभाः; D1 भरतोत्तमाः. — c) Ś1 आवां (for आर्यां). K5 दृष्ट्वा (for कृत्वा). — d) K3 त्यजंती. Ko–2 च (for स्म). Da1 D1. 5. 6 संयुगे. — e) K3–5 D2. 4. 6 तु (for च). D7 समरं. — D7 om. 30^{f}–32^{a}. — f) B1. 3. 4 जग्मुर् (for जघ्नुर्). B1 Da1 Dn1 D3. 4 S लोक-; B2. 4 लोके (for लोकं). K3–5 D2. 6 निजघ्नुस्तावका (K3. 5 D2 °कान्) रणे.

31 D7 om. 31 (cf. v. l. 30). — a) Ko T2 M1. 3. 5 तथाक्रंदो; T1 G4 अत्र नादो; G1–3 अत्राक्रंदो; M5 (*sup. lin.*) तदाक्रंदो. — M1. 3. 5 transp. 31^{cd} and 32^{ab}. — c) G3 युध्यतां; Cv वध्यतां (as in text). D1 घोरे (for राजन्). — d) D8 महात्मनां. — M2 *repeats* 31^{cd}.

32 D7 om. 32^{a} (cf. v. l. 30). M1. 3. 5 transp. 31^{cd} and 32^{ab}. — a) K5 T2 M4 तच्छ्रुत्वा (for तं श्रुत्वा). — b) D2 महारथाः; D8 S विशां पते (for महारथौ). — After 32^{ab}, D2 reads 30. — Ś1 om. (hapl.) 32^{c}–33^{b}. — c) K4 [अ]न्योन्यं (for [आ]वन्त्यौ). — d) K3–5 B2 Da Dn1 D2. 3. 5 S समुपस्थितौ (K5 °तं) (for प्रत्युपस्थितौ).

33 Ś1 om. 33^{ab} (cf. v. l. 32). — a) S (except M4) ततोस्य (for तौ तस्य). K5 तुरगौ; D3 तु हयान् (for तुरगान्). — d) K5 पार्षतौ.

34 a) K2. 3 [अ]थ पांचाल्यौ; S (except M4) ततो यानात् (G2 रथो याना) (for [अ]थ पाञ्चाल्यो). — b) Ko–2. 5 B2 D1–3 °रथः; Da1 Dn1 D5 °बलं

आरुरोह रथं तूर्णं सात्यकेः सुमहात्मनः ॥ ३४
ततो युधिष्ठिरो राजा महत्या सेनया वृतः ।
आवन्त्यौ समरे क्रुद्धावभ्ययात्स परंतपौ ॥ ३५
तथैव तव पुत्रोऽपि सर्वोद्योगेन मारिष ।
विन्दानुविन्दावावन्त्यौ परिवार्योपतस्थिवान् ॥ ३६
अर्जुनश्चापि संक्रुद्धः क्षत्रियान्क्षत्रियर्षभ ।
अयोधयत संग्रामे वज्रपाणिरिवासुरान् ॥ ३७
द्रोणश्च समरे क्रुद्धः पुत्रस्य प्रियकृत्तव ।
व्यधमत्सर्वपाञ्चालांस्तूलराशिमिवानलः ॥ ३८
दुर्योधनपुरोगास्तु पुत्रास्तव विशां पते ।
परिवार्य रणे भीष्मं युयुधुः पाण्डवैः सह ॥ ३९
ततो दुर्योधनो राजा लोहितायति भास्करे ।
अब्रवीत्तावकान्सर्वांस्त्वरध्वमिति भारत ॥ ४०
युध्यतां तु तथा तेषां कुर्वतां कर्म दुष्करम् ।
अस्तं गिरिमथारूढे नप्रकाशति भास्करे ॥ ४१
प्रावर्तत नदी घोरा शोणितौघतरङ्गिणी ।
गोमायुगणसंकीर्णा क्षणेन रजनीमुखे ॥ ४२
शिवाभिरशिवाभिश्च रुवद्भिर्भैरवं रवम् ।
घोरमायोधनं जज्ञे भूतसंघसमाकुलम् ॥ ४३
राक्षसाश्च पिशाचाश्च तथान्ये पिशिताशनाः ।

C. 6. 3833
B. 6. 86. 45
K. 6. 86. 45

(for °बलः). T G_{2-4} $M_{1-3.5}$ हृ(G_3 य)ताश्वाद्भरतर्षभ ; G_1 हताश्वात्पुरुषर्षभ ; M_4 हताश्वात्तु रथाद्बली· —^{c}) K_3 रथात् (for रथं). Da Dn_1 D_5 हंतुं ; D_1 चैव (for तूर्णं). —^{d}) $D_{1.2}$ सात्यकेस्तु ; D_2 °कस्य ; S सात्वतस्य (for सात्यकेः सु°).

35 ^{c}) K_4 आरण्यौ ; D_2 अवंत्यौ· S आवंत्यावथ संक्रुद्धः· —^{d}) K_2 अभ्यायात्स ; Da Dn_1 D_5 अभ्य-धावत् ; Dn_2 $D_{4.6-8}$ अधावत ; D_1 अभ्ययाच्च· $Ś_1$ K_5 Da_2 $D_{1.2}$ परंतपः ; B_1 Da_1 Dn_1 D_5 परंतप· S समभ्यायात्तरस्विनौ·

36 ^{a}) D_1 पुत्रस्तु ; D_8 पुत्रापि· —^{b}) D_2 सर्वो-द्योगं च (for °द्योगेन). K_3 मारिषः ; D_3 T_1 G M (except M_4) भारत· —^{c}) $K_{0.5}$ समरे (for [आ]व-न्त्यौ). —^{d}) $K_{3.5}$ D_3 परिवार्योपतस्थिरे ; B Da_2 Dn $D_{2.4.7.8}$ °वार्यावतस्थिवान् ; Da_1 D_5 °वार्य वितस्थिवान्·

37 G_4 om. 37. —^{a}) $G_{1.3}$ अर्जुनोपि सुसंक्रुद्धः· —^{b}) K_{0-2} समरे (for क्षत्रियान्). $K_{0.1}$ क्षत्रियर्ष-भान् ; $K_{2.4}$ B Da_1 D_6 T_1 $G_{1.2}$ °र्षभः ; D_1 क्षत्रियो-त्तमः ; G_3 $M_{2.5}$ भरतर्षभः. —^{c}) $D_{5.7}$ आयोधयत ; D_8 अयोध्ययत· —^{d}) K_5 इवासुरः·

38 ^{a}) $K_{2.3.5}$ B_3 $D_{1-3.6}$ T_1 G M द्रोणस्तु ; Da_1 D_5 द्रौणिश्च ; Dn_2 T_2 द्रोणस्य (for द्रोणश्च). —^{b}) M_4 पुत्रस्तु· D_1 तव पुत्रप्रिये रतः· —^{c}) K_5 सर्वपांचाल्यांस ; B Da_2 Dn $D_{2.4.5.8}$ °पंचालांस् ; D_1 स तु पांचालांस् ; T_1 G M (except M_4) तत्र पां°· —^{d}) Da_1 इवाचलः ; D_1 M_{3-5} इवानिलः·

39 ^{a}) K_2 °पुरोगांस्तु ; Da_1 D_5 °पुरोगाश्च ; Da_1 °पुरोगास्ते· —^{b}) Da_1 पुत्रस्तव ; D_1 तव पुत्रा (by transp.). —^{c}) T_1 G_4 रथैर् (for रणे). —^{d}) G_3 युयुत्सुः·

40 ^{a}) S युधिष्ठिरो (for दुर्योधनो). —^{b}) D_1 भास्वति (for भास्करे). —^{c}) B_4 योधांस् (for सर्वांस्). S अब्रवीत्तु सुसंक्रुद्धस्· —^{d}) $Ś_1$ भास्वर ; D_5 भास्कर (for भारत). D_1 त्वरयध्वं तथा नृपाः·

41 ^{a}) D_6 युद्धतां तु ; M_4 युध्यतां हि. K_0 D_8 S ततस् ; $K_{2.4}$ B_1 यथा ; K_5 $D_{1.2.6}$ तदा (for तथा). —^{cd}) B_4 न प्राज्ञयत ; D_6 M_2 अप्रकाशति ; D_8 $G_{1.3}$ नप्रज्ञायत (for नप्रकाशति). $K_{3.5}$ D_2 नाप्रकाशत भास्करः· D_1 सूर्यमस्तं गिरिप्राप्त अप्रकाशे विभावसौ·

42 ^{a}) S (except T_2 M_4) ततः प्रावर्तत नदी· —^{b}) $Ś_1$ शोणितौघा ; D_1 लोहितौघ° ; D_8 शोणितांत्र° ; T_2 शोणिताय ; G_2 शोणितोघ°. —^{c}) Dn_2 $D_{4.7.8}$ गोमायुशतसंकीर्णा· —^{d}) B Da Dn D_{5-8} क्षणेन क्षण-दामुखे·

43 ^{a}) T_2 M_4 शिवाभिश्च रुदं(M_4 °वं)तीभिः. —^{b}) K_3 D_2 रवद्भिर् ; D_1 नदद्भिर् ; D_7 वदद्भिर् (for रुवद्भिर्). $Ś_1$ K_3 D_2 (marg. *sec. m.*) स्वनं ; K_1 नवं ; D_2 (before corr.) त्वनं ; D_6 स्वरं (for रवम्). K_4 B_1 Da Dn $D_{5.7}$ M_1 (*inf. lin.*) रुवंती-(Da_1 °ति)भिः समंततः ; B_2 $D_{4.8}$ T_1 $G_{2.4}$ $M_{2.3.5}$ रुद(B_2 °दं)तीभिः समंततः ; $G_{1.3.4}$ (*inf. lin.*) रुव-तीभिः समंततः ; T_2 अशिवाभिः समंततः ; M_4 क्रव्या-दैश्च समंततः· —^{c}) B_1 संख्ये ; D_8 यज्ञे (for जज्ञे). —^{d}) $K_{3.5}$ $D_{2.6}$ भूतसंघैश्च संकुलं ; D_3 °संघैः समाकुलं·

C. 6. 3634
B. 6. 86. 45
K. 6. 86. 45

समन्ततो व्यदृश्यन्त शतशोऽथ सहस्रशः ॥ ४४
अर्जुनोऽथ सुशर्मादीन्राज्ञस्तान्सपदानुगान् ।
विजित्य पृतनामध्ये ययौ स्वशिबिरं प्रति ॥ ४५
युधिष्ठिरोऽपि कौरव्यो भ्रातृभ्यां सहितस्तदा ।
ययौ स्वशिबिरं राजा निशायां सेनया वृतः ॥ ४६
भीमसेनोऽपि राजेन्द्र दुर्योधनमुखान्रथान् ।
अवजित्य ततः संख्ये ययौ स्वशिबिरं प्रति ॥ ४७
दुर्योधनोऽपि नृपतिः परिवार्य महारणे ।
भीष्मं शांतनवं तूर्णं प्रयातः शिबिरं प्रति ॥ ४८
द्रोणो द्रौणिः कृपः शल्यः कृतवर्मा च सात्वतः ।
परिवार्य चमूं सर्वां प्रययुः शिबिरं प्रति ॥ ४९
तथैव सात्यकी राजन्धृष्टद्युम्नश्च पार्षतः ।
परिवार्य रणे योधान्ययतुः शिबिरं प्रति ॥ ५०
एवमेते महाराज तावकाः पाण्डवैः सह ।
पर्यवर्तन्त सहिता निशाकाले परंतपाः ॥ ५१
ततः स्वशिबिरं गत्वा पाण्डवाः कुरवस्तथा ।
न्यविशन्त महाराज पूजयन्तः परस्परम् ॥ ५२
रक्षां कृत्वात्मनः शूरा न्यस्य गुल्मान्यथाविधि ।

---

44 [b]) K1.2 B Da2 Dn1 पिशिताशिनः; D5 °शन. — [c]) Da1 व्यदृश्यंते; G1.3 [ऽ]प्यदृश्यंत; M (except M4) ह्यदृश्यंत. — After 44, D1 ins.:

334* मत्ता रुधिरगन्धेन पिशितेन च ते नृपाः ।
आस्वाद्यास्वाद्य नृत्यन्ते नादं मुञ्चन्ति भीषणम् ।
कबन्धानि च नृत्यन्ति धनुर्हस्तानि संयुगे ।
प्रासमालम्ब्य निशितं निस्त्रिंशं निर्मलं महत् ।

45 [a]) K5 D2.3 M4 [ऽ]पि (for ऽथ). D1 सु- संवार्य (for सुशर्मादीन्). — [b]) B1 राज्ञः शतसहस्रशः; B2 D (except D1-3.6) T2 राज्ञः सहपदानुगान्. — [d]) K5 प्रभुः (for प्रति).

46 K3 om. (hapl.) 46–48; D1 om. 46–47. — [a]) Dn2 T2 कौरव्य. — [b]) Ko.2 भ्रातृभिः. Ko-2 प्रभुः; K5 D2 तथा; D3 S वशी (for तदा). — [c]) Ś1 Ko-2.4 प्रययौ शिबिरं; G3 यथा स्वशिबिरं. Ś1 Ko-2 Da2 Dn2 D6.7 M4 राजन्; T1 G रात्रौ (for राजा). — [d]) K5 D2 महत्या; T1 G निजया (for निशायां).

47 K3 D1 om. 47 (cf. v. l. 46). — [a]) S भीमसेनो महाराज. — [b]) Da Dn1 (before corr.) D5 भीमसेनमुखान्; T G M2.4 सिंधुराज°; M1.3.5 आर्वं- त्यप्रमुखान्. K5 D2 रणे; T1 G M2 नृपान् (for रथान्). — [c]) K5 Da Dn1 D5 अविजित्य; T1 G M1-3.5 पराजित्य; T2 M4 परित्यज्य (for अवजित्य). Ko-2 नृपान् (for ततः). T2 G1-3 M संखे (M4 °घे). — [d]) Ś1 Ko-2 प्रययौ (for ययौ स्व-). — After 47, T1 G4 read 50.

48 K3 om. 48 (cf. v. l. 46). Da1 reads 48 after 54. — [a]) D1 तु (for [अ]पि). — M2 om. 48^b–49^a. — [b]) Da Dn1 D5 महारथैः; D3 निवारणे; M1.3.5 महाव्रतं (for महारणे). — [c]) D1 चैव (for तूर्णं). — [d]) Ko-3 प्रययौ; D1 ययौ स्व-; T2 प्रायात्स्व- (for प्रयातः). — After 48, M1 reads 51^{ab}, *repeating* it in its proper place.

49 Da1 om. (hapl.) 49. M2 om. 49^a (cf. v. l. 48). — [a]) K1 G3 द्रोणिः (for द्रौणिः). — [b]) K5 D2 भारत (for सात्वतः). — [c]) D3 रणे; T1 G4 ततः; T2 G1-3 M (except M4) चमूः (for चमूं). K5 D2 सेनां; B1.2 Da2 Dn D4.6.7.8 T1 G4 सर्वे; D3 योधान्; T2 G1-3 M (except M4) सर्वाः. — [d]) D3 T1 G1.3.4 ययुः स्व-; G2 ययौ स्व- (for प्रययुः).

50 Ś1 om. (hapl.) 50. T1 G4 read 50 after 47. — [a]) D3 तेष्वेष (for तथैव). S सा(M2-5 स)- त्यको (for सात्यकी). T1 G राजा. — [b]) B4 वीर्यवान् (for पार्षतः). — [c]) D1 योधाः; G1-3 M (except M1) यौधान्. — [d]) K4 B2.4 D1 प्रययुः; K5 युयुधुः; B1 प्रयातः; Da1 आयतः; Dn1 आययुः; T1 G4 जग्मतुः; M3.5 प्रयतुः (for ययतुः).

51 [a]) D5 एवमेव; G1-3 एवमेतन्. — D5 om. (hapl.) 51^c–52^b. — [c]) Ko-3.5 D2 (m as in text) M5 परिवर्तंत; Da1 पर्यवर्तंत. K3.5 D2 T1 G सहसा; T2 संग्रामान् (for सहिता). — [d]) G1.3 युद्ध- काले (for निशा°). B1 Da Dn1 D1.2 S (except M1) परंतप (Da1 °पः).

52 D5 om. 52^{ab} (cf. v. l. 51). — [a]) S यथा (M1.2 तथा) (for ततः). D1 ते (for स्व-). Ś1 कृत्वा (for गत्वा). — [b]) Ś1 कौरवास्तथा; K3-5 B D (D5 om.) S कुरुभिः सह (for कुरवस्तथा). — After 52^{ab}, D4 *repeats* 51^c–52^b. — [c]) K3.5 D1.2.6 न्यव-

अपनीय च शल्यांस्ते स्नात्वा च विविधैर्जलैः ॥ ५३
कृतस्वस्त्ययनाः सर्वे संस्तूयन्तश्च बन्दिभिः ।
गीतवादित्रशब्देन व्यक्रीडन्त यशस्विनः ॥ ५४
मुहूर्तमिव तत्सर्वमभवत्स्वर्गसंनिभम् ।
न हि युद्धकथां कांचित्तत्र चक्रुर्महारथाः ॥ ५५
ते प्रसुप्ते बले तत्र परिश्रान्तजने नृप ।
हस्त्यश्वबहुले राजन्प्रेक्षणीये बभूवतुः ॥ ५६

इति श्रीमहाभारते भीष्मपर्वणि द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

८३

संजय उवाच ।
परिणाम्य निशां तां तु सुखसुप्ता जनेश्वराः ।
कुरवः पाण्डवाश्चैव पुनर्युद्धाय निर्ययुः ॥ १
ततः शब्दो महानासीत्सेनयोरुभयोरपि ।

C. 6. 3648
B. 6. 87. 2
K. 6. 87. 2

संत; B1 न्यविसंत; B1 Dn2 D4. 7. 8 अविशंत (for न्यविशन्त). —d) G1 कथयंतः (for पूज°).

53 a) K2 रक्षा; M2 रूक्षा. B3. 4 कृत्वा ततः; M2 कृतात्मनः (for कृत्वात्मनः). Ś1 शूरान् (for शूराः). —b) K3. 5 त्यक्त्वा; Dn2 D1. 7. 8 दृष्ट्वा; D1 स्थाप्य; D2 तूक्त्वा; D3 न्यस्त्वा (for न्यस्य). S न्यस्तगुल्मा (G1. 3 °ल्मान्) (for न्यस्य गुल्मान्). Cc cites गुल्मान् (as in text). —c) T2 व्यपनीय (for अपनीय). K3. 5 D2 शस्त्राणि; K4 B3. 4 D1. 6 T G M1. 3–5 शल्यानि; M2 शय्यानि (for शल्यांस्ते). Cc cites ते (as in text). —d) K5 स्मृत्वा (for स्नात्वा). Ś1 विमलैर्; K3. 5 Da Dn D2. 4–8 विधिवज्; D3 विचित्रैर् (for विविधैर्). D1 ओषधीभिश्चिकित्सया; M1. 2 स्नात्वा बहुविधैर्जलैः.

54 b) K3–5 B1. 2 D (except D1. 3) S स्तूयमानाश्च (for संस्तूयन्तश्च). Ś1 S (except T1 G4) बंदिभिः. —c) K0–2 गीतवादित्रशब्दैश्च. —d) K3 व्यक्रीडंतो; B D (except D2) M4 चिक्रीडुस्ते; T G4 M1–3. 5 चिक्रीडंतो; G1–3 विक्रीडंते. K5 D2 परस्परं (for यशस्विनः). — After 54, Da1 reads 48.

55 a) K3. 5 B D मुहूर्तादिव. K3. 5 D2 सैन्यम् (for सर्वम्). —b) K0–3 B4 Da Dn D3–5. 8 S स्वर्ग(T2 स्वप्न°; G2 स्पर्श°; M4 स्वन)संमितं. —c) S युद्धकथाः (M2 °क्षमाः). K4 D2 T1 G केचित्; D6 काचित्; T2 M काश्चित् (for कांचित्). —d) K5 तव चक्रुर्; B तत्राकुर्वन् (for तत्र चक्रुर्). Ś1 K0–2 नरर्षभाः (for महारथाः).

56 a) K3 सुप्रसुप्ते; K5 ते प्रसुते; D2 ते प्रस्तुते (for ते प्रसुप्ते). S राजन् (for तत्र). —b) T1 G1 परिश्रांते. B4 तदा; S निशि (for नृप). —c) Ś1 K0. 1 °बहले; T2 °बहुलो. K5 D2. 6 रात्रौ; G1. 3 सेने; G2. 4 M घोरे (for राजन्). D1 हस्त्यश्वरथपादात°.

Colophon. — *Sub-parvan:* Omitting sub-parvan name, Ś1 K Da Dn1 D2 mention only सप्तमो युद्धदिवसः; K4 (*also*) T2 सप्तमेऽह्नि; B2 M2. 4. 5 सप्ताह्निकं; B3 Dn2 D5. 6 सप्तमदिवसयुद्धं; D1 सप्तमो दिवसः; D8 सप्तम अहः; D4. 8 सप्तम(D8 om. म)दिनयुद्धं; T1 G सप्तमापहारः; M1 सप्तमेऽहनि; M3 सप्ताह्निकं. K2. 4. 5 Dn2 D2. 4. 6 S (except T2) cont. समाप्त. — *Adhy. name:* K4 कौरवपराजयः; T2 G2. 3 M1–3 शिबिरप्रवेशः. — *Adhy. no.* (figures, words or both): Da2 (*sec. m.*) ८८; Dn2 T2 M3. 4 83; D6 T1 G 81; M1. 2 82 (as in text); M5 84. — *Śloka no.:* Dn2 D6 57; D5 56.

83

1 a) K5 परिणम्य; Ca. c °णाम्य (as in text). Ś1 K0. 2 T2 ते तु; M2 तास्तु (for तां तु). Cd as in text. —b) K3 Da2 D5 M2 सुखं सुप्ता; B

C. 6. 3548
B. 6. 87. 2
K. 6. 87. 2

निर्गच्छमानयोः संख्ये सागरप्रतिमो महान् ॥ २
ततो दुर्योधनो राजा चित्रसेनो विविंशतिः ।
भीष्मश्च रथिनां श्रेष्ठो भारद्वाजश्च वै द्विजः ॥ ३
एकीभूताः सुसंयत्ताः कौरवाणां महाचमूः ।
व्यूहाय विदधू राजन्पाण्डवान्प्रति दंशिताः ॥ ४
भीष्मः कृत्वा महाव्यूहं पिता तव विशां पते ।
सागरप्रतिमं घोरं वाहनोर्मितरङ्गिणम् ॥ ५
अग्रतः सर्वसैन्यानां भीष्मः शांतनवो ययौ ।
मालवैर्दाक्षिणात्यैश्च आवन्त्यैश्च समन्वितः ॥ ६
ततोऽनन्तरमेवासीद्भारद्वाजः प्रतापवान् ।
पुलिन्दैः पारदैश्चैव तथा क्षुद्रकमालवैः ॥ ७
द्रोणादनन्तरं यत्तो भगदत्तः प्रतापवान् ।
मागधैश्च कलिङ्गैश्च पिशाचैश्च विशां पते ॥ ८
प्राग्ज्योतिषादनु नृपः कौसल्योऽथ बृहद्बलः ।

Dn2 D6 सुखं प्राप्ता; D1 सुखं प्राप्य; D4 (before corr.). 7. 8 सुखप्राप्ता; G3 सुखसुस-; M1. 4 सुखं सुप्त्वा. Ś1 D1 T2 M4 जनेश्वरः; Dn2 °श्वर. — ^{c}) K1 कुरवाः; K3 Da1 कुरुवः. K4 पांडवाः सर्वे; Da Dn1 D5 पांडवेया(Da1 °य)श्च (for पाण्डवाश्चैव).

2 ^{b}) Ś1 K0–2 B1. 3. 4 D (except D1. 2) सैन्ययोर् (for सेनयोर्). K3 D4 T1 G1. 2 (*also* as in text). 4 M नृप (M2 नृपः); D6 ततः (for अपि). — ^{c}) K3 B1 Da2 Dn1 D2. 5. 8 निर्गच्छतो(K3 °च्छतो-; D2 °च्छंतो)सदा (for निर्गच्छमानयोः). D1 G1–3 M2. 5 संखे. — ^{d}) Ś1 सागरप्रतिमौ; B2 सशिरःप्रतिमो (sic). T2 G2. 3 M यथा सागरयोरिव.

3 ^{a}) M1. 2 तथा (for ततो). — ^{b}) K0–2 D2 विशां पतिः; D5. 8 विशां पते (for विविंशतिः). M1 चित्रसेनविविंशती. — K5 om. 3^{cd}. — ^{d}) D6 (m as in text) भारद्वाजस्य; G1 भरद्वाजश्च. B4 D7. 8 स वै; D1 तथा (for च वै). D1. 3 नृप; D5 द्विज (for द्विजः). K0–2 भारद्वाजश्च वीर्यवान्.

4 ^{a}) K1 एके भूताः; G3 एकीभूत-. K0–2 D2 स्वयं यत्ताः; D6 सुसंयाताः (for सुसंयत्ताः). D1 एते चान्ये च संयत्ताः. — ^{b}) K0–2 B1. 2. 4 Da Dn D1. 4–6. 8 महारथाः; K4 B3 D2. 3. 7 T G3. 4 M1. 2. 4 °चमूं (for °चमूः). — ^{c}) K0–2 व्यूहा(K0 °ह)न्वै; D1 व्यूहं वै; C6 व्यूहाय (as in text). K5 D2 व्यदधू; D4 निदधू (for विदधू). Ś1 व्यूढाय विदधे राजन्; D8 (marg. *sec. m.*) व्यूहान्परिदधू राजन्. — ^{d}) K0–2 D7 T2 M1–3. 5 दंसिताः; T1 G1–3 M4 दंसितान्.

5 B2 transp. 5^{ab} and 5^{cd}. — ^{a}) D1. 3 तु तं (for महा-). D4 (marg. *sec. m.* by corr.) S ऊर्मि(T2 G1–3 M4 orig. कूर्मं)व्यूहं ततः कृत्वा. — ^{b}) D1 S पिता देवव्रतस्तव. — ^{d}) B1. 3 त्राहनौर्मि-. K0. 2 तरंगितं; K5 -तरंगिणः.

6 ^{a}) K4 मुखतः (for अग्रतः). — ^{c}) B2 मासुरैर्; S (mostly) माळवैर्. — ^{d}) K5 D5. 8 अवंतैश्च. T1 G M4 समावृतः (M4 °ताः); T2 महाव्रतः; M1–3. 5 तथा वृतः (for समन्वितः).

7 ^{a}) K3 नेतानंतरम्; S तदनं (for ततोऽनन्तरम्). — ^{c}) Ś1 चिकुंडैः; K0. 2 विकुट्टैः; K1 D3 विकुंडैः; K3. 5 D2 कुणिंदैः; B1 Da1 Dn1 D3 कुलिंदैः; D1 विकुंदैः; S (mostly) पुलिंदैर् (for पुलिन्दैः). D2 पारिदैश्; T1 G1. 4 M3 दर्दरैश्; G2. 3 दुर्दरैश्; M1. 2. 4. 5 द(M2 दु)रदैश् (for पारदैश्). D (except D1–3. 6) M (except M4) चापि (for चैव). — ^{d}) K5 क्षुद्रव्य; D3 रुंडक- (for क्षुद्रक-). D8 S (mostly) -माळवैः.

8 ^{a}) K4 B2 Dn1 (by corr.) D4. 7. 8 M1. 2. 5 द्रोणादनंतरो. T1 G4 युद्धे; T2 शक्तो (for यत्तो). — ^{c}) K2 Da1 Dn1 D4 मगधैश्च (for मागधैश्च). K5 D2 कुलिंदैश्च; T1 G4 विशालैश्च (for कलिङ्गैश्च). B1 मागधैश्चैव कालिंगैः. — After 8^{c}, T2 *repeats* (with v. l.) 6^{d} and 7^{a}. — ^{d}) K5 विशांश्चैव; D1 नामलिंगैर्; T1 G विशालैश्च; T2 मात्रेयश्च (for पिशाचैश्च).

9 D1 om. 9^{a}–10^{b}. — ^{a}) Ś1 K0–2. 4 भगदत्तादनु (for प्राग्ज्योतिषादनु). K5 G3 नृपं; D3 नृप; M2 नृपाः (for नृपः). T2 प्राग्ज्योतिषश्च नृपतिः. — ^{b}) K2 कौत्सल्योथ; K3. 5 Da1 Dn1 D2. 3. 6–8 कौशल्यो(D3 °ल्या)थ; Da2 D5 T1 G कौसलोथ. D6 बृहच्छ्रवाः (*sup. lin.* °द्रथः) (for बृहद्बलः). — ^{c}) Ś1 मेकलं; K0–2 चेलकैस्; T1 G1. 3. 4 M2. 4 मेखलैस्; T2 G2 M1. 3. 5 मेचलैस् (for मेकलैस्). Ś1 त्रैमुरैश्चैव; K3–5 B1–3 Da1 Dn1 D2. 5 T1 G त्रिपुरै°; Dn2 D3 त्रैपुर°; D6 च कुरिंदैश्च; Bom. ed. कुरुविन्दैश्च (for

मेकलैस्त्रैपुरैश्चैव चिच्छिलैश्च समन्वितः ॥ ९
बृहद्बलात्ततः शूरस्त्रिगर्तः प्रस्थलाधिपः ।
काम्बोजैर्बहुभिः सार्धं यवनैश्च सहस्रशः ॥ १०
द्रौणिस्तु रभसः शूरस्त्रिगर्तादनु भारत ।
प्रययौ सिंहनादेन नादयानो धरातलम् ॥ ११
तथा सर्वेण सैन्येन राजा दुर्योधनस्तदा ।
द्रौणेरनन्तरं प्रायात्सोदर्यैः परिवारितः ॥ १२
दुर्योधनादनु कृपस्ततः शारद्वतो ययौ ।
एवमेष महाव्यूहः प्रययौ सागरोपमः ॥ १३
रेजुस्तत्र पताकाश्च श्वेतच्छत्राणि चाभिभो ।
अङ्गदान्यथ चित्राणि महार्हाणि धनूंषि च ॥ १४
तं तु दृष्ट्वा महाव्यूहं तावकानां महारथः ।
युधिष्ठिरोऽब्रवीत्तूर्णं पार्षतं पृतनापतिम् ॥ १५
पश्य व्यूहं महेष्वास निर्मितं सागरोपमम् ।
प्रतिव्यूहं त्वमपि हि कुरु पार्षत माचिरम् ॥ १६
ततः स पार्षतः शूरो व्यूहं चक्रे सुदारुणम् ।
शृङ्गाटकं महाराज परव्यूहविनाशनम् ॥ १७
शृङ्गेभ्यो भीमसेनश्च सात्यकिश्च महारथः ।
रथैरनेकसाहस्रैस्तथा हयपदातिभिः ॥ १८
नाभ्यामभून्नरश्रेष्ठः श्वेताश्वो वानरध्वजः ।

C. 6. 3665
B. 6. 87. 19
K. 6. 87. 19

त्रैपुरैश्चैव). — d) Ś1 चिच्छिरैश्च; K3 S वर्वरै° (T1 शबरै°); K4 Da Dn1 D5 पुंड्रकै°; K5 संयति°; B चित्रकै°; Dn2 D7. 8 चिवुकै°; D2 संयतै°; D3 चिधिरै°; D4 चुवुकै°; D6 त्रिच्छिलै° (for चिच्छिलैश्च). B2 S समंततः (for समन्वितः).

10 D1 om. 10ab (cf. v. l. 9). D2 (*sec. m.*) reads 10 in marg. — a) Ś1 K5 B2. 4 Dn2 D2. 8 बृहद्बलस्ततः शूरस्; K2 °लसुतः शूरस्; K4 °लादंतरतस्; Da Dn1 D5. 7 °लादनु ततस्; D6 °लादुत्तरतस्; S °लादनु नृपस् (for °लात्ततः शूरस्). — Ś1 om. 10b. — b) K0–3 Dn2 D3. 7. 8 Cv त्रैगर्तः (for त्रिगर्तः). Cv प्रच्छलाधिपः. — c) K0. 1 कांभोजैर्. K1 सार्धैर् (for सार्धं). — d) Dn2 D4. 7. 8 प्रवरैश् (for यवनैश्). K0–2 समंततः; K3. 5 D2 समन्वितः (for सहस्रशः).

11 D2 (*sec. m.*) reads 11ab in marg. — a) K0 द्रौणिश्च; K1. 4 B D1. 4 द्रोणिस्तु; K2 द्रोणिश्च; Da1 द्रोणिः सु- (for द्रौणिस्तु). K0–2 रथिनां श्रेष्ठस्; K5 सरथं शूरस्; D1 रभसं शूरस्; T2 रभसं क्रूरस्. — b) Ś1 K4 त्रिगर्तादथ (K4 °थ); B1–3 त्रैगर्तादनु; B4 Dn2 D7. 8 त्रिगर्तानतु. — K5 D3 om. 11cd. — d) Ś1 नाधयानो (sic); K0–2 छाद° (for नाद°). S नभस्तलं (for धरा°).

12 a) D2 सर्वाणि सैन्यानि; G3 सैन्येन सर्वेण (by transp.). — b) K0–2 ततः (for तदा). — c) K2 D4. 6 द्रोणेर्; K5 द्रौणिश्च; D3 द्रौणेश्च. G3 अनंतरः. M1–3. 5 राजा (for प्रायात्). — d) K1. 2. 5 D2. 4 सौदर्यैः; Da Dn D1. 3. 5. 7. 8 S सोदरैः (for सोदर्यैः).

13 ab) K1. 2. 3 Da1 transp. ततः and कृपः. S ययौ (for ततः), and युधि (for ययौ). — c) D2 एवमेषां; T1 G एवमेव. Ś1 महाव्यूहाः; T2 G2 °व्यूहं. — d) G2 सागरोपमं.

14 a) Da1 रेजुस्तत्र; T2 रेजुचित्र-. M1. 3. 5 पताकानि. — b) K0 चाविभोः; K2. 3 D2 चाविभो; K4 B Da Dn D3–5. 7. 8 चा (B3 वै) विभो; D6 तत्र वै; T1 G भारत; T2 साभिभो (for चाभिभो). — c) K4 B Dn1 [अ]त्र (for [अ]थ). S शुभ्राणि (for चित्राणि). D3 अंगदानि विचित्राणि. — d) Dn2 D4. 7. 8 तोमराणि (for महार्हाणि). T1 G महांति (for धनूंषि). B2. 4 धनूंषि तोमराणि च.

15 a) Ś1 K0–2 तं च (for तं तु). K3 तथा व्यूहं. — b) Ś1 K0–2 महारथाः; T1 G °बलः (for °रथः). — c) Ś1 K3. 5 राजन्; D6 राजा (for तूर्णं). — d) K1 पार्पितं (for पार्षतं).

16 b) T2 विहितं (for निर्मितं). — c) D2 प्रतिव्यूह. K0–2 त्वमपि वै; K4 B2. 3 Da2 Dn1 त्वमप्यत्र; B4 Dn2 D4. 6–8 त्वमपि मे; Da1 D5 त्वमप्यन्यं; T G M4 रणे शूर; M1–3. 5 महाबाहो (for त्वमपि हि). — d) B D सत्वरं (for माचिरम्). S कुरु क्षिप्रं महारथ (T2 M2 °थः; M1 °थं).

17 a) Da D1. 5 M तु (for स). Bom. ed. क्रूरो (for शूरो). — c) Ca शृंगारकं. Da Dn1 D5 महाव्यूहं (for °राज). Cv as in text. — d) Da1 महा- (for पर-). Dn2 D6 परव्यूहविनाशकं; S तत्र व्यूहविदारणं.

18 a) K3. 5 D2 शृंगेषु; K4 B Da Dn D1. 3–8 Ca शृंगाभ्यां; T1 G1. 4 शृंगोभूद्; T2 G2. 3 M शृंगेभूद् (for शृङ्गेभ्यो). — K2 om. (hapl.) 18c–21b. — d) Ś1 तथाहं च; K0. 1 तथा हस्ति- (for तथा हय-).

C. 6. 3865
B. 6. 87. 19
K. 6. 87. 19

मध्ये युधिष्ठिरो राजा माद्रीपुत्रौ च पाण्डवौ ॥ १९

अथेतरे महेष्वासाः सहसैन्या नराधिपाः ।
व्यूहं तं पूरयामासुर्व्यूहशास्त्रविशारदाः ॥ २०

अभिमन्युस्ततः पश्चाद्विराटश्च महारथः ।
द्रौपदेयाश्च संहृष्टा राक्षसश्च घटोत्कचः ॥ २१

एवमेतं महाव्यूहं व्यूह्य भारत पाण्डवाः ।
अतिष्ठन्समरे शूरा योद्धुकामा जयैषिणः ॥ २२

भेरीशब्दाश्च तुमुला विमिश्राः शङ्खनिस्वनैः ।
क्ष्वेडितास्फोटितोत्क्रुष्टैः सुभीमाः सर्वतोदिशम् ॥ २३

ततः शूराः समासाद्य समरे ते परस्परम् ।
नेत्रैरनिमिषै राजन्नवैक्षन्त प्रकोपिताः ॥ २४

मनोभिस्ते मनुष्येन्द्र पूर्वं योधाः परस्परम् ।
युद्धाय समवर्तन्त समाहूयेतरेतरम् ॥ २५

ततः प्रववृते युद्धं घोररूपं भयावहम् ।
तावकानां परेषां च निघ्नतामितरेतरम् ॥ २६

नाराचा निशिताः संख्ये संपतन्ति स्म भारत ।

---

19 K2 om. 19 (cf. v. l. 18). — ^{a}) K1. 3–5 Da Dn1 D1–3. 5–7 T2 ताभ्याम्; T1 G नाभाव् (for नाभ्याम्). D2. 6 बभौ; M1–3. 5 आसीन् (for अभून्). Ś1 K4 D1 नृपश्रेष्ठः (D1 °ष्ठ); Ko. 1. 3 Da1 S (except T2) नरश्रेष्ठ; D8 नरव्याघ्र (for नरश्रेष्ठः). — ^{b}) D1 m पृषताश्वो (hypermetric). B Da Dn D3–5. 7. 8 श्वेताश्वः कृष्णसारथिः. — After 19^{ab}, G2 reads 21^{cd} and 20^{ab}, *repeating* them in their proper places. — After 19, D1 reads 21^{cd}.

20 K2 om. 20 (cf. v. l. 18). T G M2 transp. 20 and 21. — ^{a}) B Dn2 D4. 7. 8 G1. 3 तथेतरे; Da1 Dn1 D5 अथेतरा; D1 तथापरे; D3 अथांतरे; Bom. ed. अथोत्तरे. — ^{b}) Ś1 सहसैन्य-; T1 G M4 सर्वसैन्यैर्; T2 सर्वसैन्य- (for सहसैन्या). B2–4 Dn2 D4. 7. 8 महारथाः; D2 T2 नराधिप (T2 °पः); G1. 3 जनाधिपाः. G2 (first time) सिताश्वो वानरध्वजः (cf. 19^{b}). — ^{c}) Ś1 तु; D8 तत् (for तं). T2 पूजया°; M1–3 व्यूहया° (for पूरया°). — ^{d}) K4 युद्ध° (for व्यूह°).

21 K2 om. 21^{ab} (cf. v. l. 18). T G M2 transp. 20 and 21. — ^{b}) Da1 Dn1 D5 M1–3. 5 महाबलः (for °रथः). D1 विराटो वाहिनीपतिः; G2 इरावांश्च महारथः. — D1 reads 21^{cd} after 19. — ^{c}) Da Dn1 D5 संक्रुद्धा (for संहृष्टा).

22 ^{a}) Ś1 Ko. 1 B3 Da D5 T2 G2 M1. 3. 5 एवमेतन्. — ^{b}) Ś1 K2. 3 व्यूह (for व्यूह्य). D1 व्यूहितं पांडवैर्नृपाः. — ^{c}) M4 योधा (for शूरा). — ^{d}) Ko–2 Da Dn1 D5 युद्ध° (for योद्धु°).

23 ^{a}) B3 T1 G4 भेरीशब्दैश्च. K3. 5 Da1 D2. 5. 6 तुमला; B3 D3 तुमुलैर्; T G2. 4 विपुला (for तुमुला). — ^{b}) B3 विमिश्रैः; Da Dn1 D5 M2 मिश्रिताः; D3 विमिश्रः; T1 विमिश्रं. Some MSS. °निःस्वनैः. — ^{c}) T2 G2. 3 M क्ष्वेळिता- (for क्ष्वेडिता-). Ś1 क्ष्वेडितास्फोटितोत्कुष्टो; Ko. 2 °स्फोटितोत्कुष्टाः; K3 D3. 5 °स्फोटितोकुष्टैः; B2 D4 °स्फोटितोत्कुष्टैः; Da1 क्ष्वेहितास्फोहितोकुष्टौ; D1 क्ष्वेडितास्फोटितोप्यश्वैः; T G2. 3 (*inf. lin.*). 4 M2 °स्फोटितोद्घुष्टैः; G1 क्ष्वेळितास्फोटतो**. Ca cites क्ष्वेडितं; Cd आस्फोटितं, and उत्क्रुष्टं. — ^{d}) Ś1 सुभीमैः; K2 सभीमां; K5 सुभीमः; B3. 4 D3 नादिताः; S तुमुलाः (for सुभीमाः). Co cites भीमः. B1 सततो- (for सर्वतो-). K3. 5 B2–4 Dn2 D1–4. 6–8 T1 G1. 4 M4 दिशः; B1 Da Dn1 D5 [ऽ]भवत् (for -दिशम्).

24 Ś1 om. 24^{ab}. — ^{a}) T1 G तत्र (for ततः). D3 शूरान् (for शूराः). — K4 om. (hapl.) 24^{c}–25^{d}; K5 M2 om. (? hapl.) 24^{cd}. K2 *repeats* (with v. l.) 24^{cd} after 25^{ab}. — ^{c}) Ko. 2 नेत्रैरनेकै राजानो. — ^{d}) Ś1 Da2 D5 अवैक्षंतः; Ko. 2 ह्यवै (Ko °वे) क्षंत; K2 (second time) न वीक्षंत; K3 D2 समाजग्मुः; Dn2 अवेक्षंत; D3 अवेक्ष्यंत; D6 आवैक्षंत; S (M2 om.) प्रेक्षांचक्रुः (for अवैक्षन्त). K3. 4 B1. 2. 4 Da Dn D2. 4–8 S (M2 om.) परस्परं; B3 नराधिपाः; D3 रणाजिरे (for प्रकोपिताः).

25 K1 om. 25 (cf. v. l. 24). — ^{a}) B D (except D1–3) नामभिस् (for मनोभिस्). B2. 3 तु (for ते). — ^{b}) K3 D2. 3 पूर्व-; B1–3 सर्वे; D5 पूर्वे; S युद्धं (for पूर्वं). G1 M यौधाः. S प्रचक्रिरे (for परस्परम्). — After 25^{ab}, K2 *repeats* 24^{cd}. — ^{cd}) S पुनराहूय तेन्योन्यं शरीरैरपि (M3. 5 °रेव; M4 °रभि-) चक्रिरे (G1 M2. 4 चक्रतुः).

26 ^{a}) Da1 D5 प्रवर्तते (for प्रववृते). — ^{b}) T2 क्रूर° (for घोर°). B D (except D2. 3. 6) M2 भयानकं; T G M1. 3–5 सुदारुणं (for भयावहम्).

व्यात्ताननां भयकरा उरगा इव संघशः ॥ २७
निष्पेतुर्विमलाः शक्त्यस्तैलधौताः सुतेजनाः ।
अम्बुदेभ्यो यथा राजन्भ्राजमानाः शतह्रदाः ॥ २८
गदाश्च विमलैः पट्टैः पिनद्धाः स्वर्णभूषिताः ।
पतन्त्यस्तत्र दृश्यन्ते गिरिशृङ्गोपमाः शुभाः ।
निस्त्रिंशाश्च व्यराजन्त विमलाम्बरसंनिभाः ॥ २९
आर्षभाणि च चर्माणि शतचन्द्राणि भारत ।
अशोभन्त रणे राजन्पतमानानि सर्वशः ॥ ३०
तेऽन्योन्यं समरे सेने युध्यमाने नराधिप ।
अशोभेतां यथा दैत्यदेवसेने समुद्यते ।
अभ्यद्रवन्त समरे तेऽन्योन्यं वै समन्ततः ॥ ३१
रथास्तु रथिभिस्तूर्णं प्रेषिताः परमाहवे ।
युगैर्युगानि संश्लिष्य युयुधुः पार्थिवर्षभाः ॥ ३२
दन्तिनां युध्यमानानां संघर्षात्पावकोऽभवत् ।
दन्तेषु भरतश्रेष्ठ सधूमः सर्वतोदिशम् ॥ ३३
प्रासैरभिहताः केचिद्गजयोधाः समन्ततः ।

C. 6. 3331
B. 6. 87. 35
K. 6. 87. 34

27 a) G$_{2.3}$ M$_3$ नाराच- (for °चा). T$_1$ G निह- (G$_4$ °हि)ताः (for निशिताः). T$_2$ G$_{1.3}$ M संखे ; G$_2$ संघे (for संख्ये). — c) Ś$_1$ D$_3$ T$_2$ भयाकारा ; D$_4$ भयंकारा ; D$_3$ भयकरम्. — d) Ś$_1$ D$_5$ तुरगा ; K$_2$ उरूगा ; G$_3$ उदरा (for उरगा). B D (except D$_{1-3, 6}$) सर्वशः (for संघशः).

28 K$_1$ om. 28^{a}–29^{b} ; D$_1$ om. 28^{ab}. — a) K$_{3.5}$ Da Dn$_1$ D$_{2.5.6}$ निपेतुर्. K$_0$ शक्तास् ; K$_2$ शक्ता ; K$_3$ शक्त्या ; K$_5$ D$_2$ शश्वत् (for शक्त्यस्). — b) D$_3$ तैलधूता- K$_{3.5}$ D$_{2.6}$ S महाप्रभाः ; B Da Dn D$_{4.5.7.8}$ समंततः ; D$_3$ सुनिर्मलाः (for सुतेजनाः). — c) K$_5$ अंबुजेभ्यो. T G$_{2.4}$ M$_1$ (*sup. lin.*) महाराज (for यथा राजन्). — d) M$_{1.2.5}$ राज° (for भ्राज°).

29 K$_1$ om. 29^{ab} (cf. v. l. 28). — a) K$_3$ D$_3$ विमलैः ; D$_6$ विविधैः ; M$_{1-3.5}$ विमलाः. D$_1$ तज्यैः (for पट्टैः). — b) Ś$_1$ विनाद्धाश्च (sic) ; K$_{0.2}$ विमलाः ; K$_{3.5}$ विनद्धाः ; K$_4$ परीताः (for पिनद्धाः). Ś$_1$ K$_0$ स्वर्णभूषणाः ; S रुक्म(T$_2$ M$_{1-4}$ °क्म)भूषिताः (for स्वर्ण°). B D (except D$_{1-3}$) हेमवद्भिर्विभूषिताः. — c) B$_3$ पतंतस्तत्र ; S आपतंत्यः (T$_2$ M$_1$ °तः) स्म (for पतन्त्यस्तत्र). — d) D$_1$ रणे ; M$_1$ शिताः (for शुभाः). — e) K$_3$ चैव दृश्यंते ; K$_5$ D$_{2.3.6}$ च व्यदृश्यंत (K$_5$ D$_2$ °ते) ; Da$_1$ D$_5$ G$_{2.3}$ च विराजंत (G$_3$ °तो) ; D$_1$ चाप्यराजंत ; T$_2$ M$_{1.3-5}$ च विराजंते (for च व्यराजन्त). — f) K$_3$ D$_3$ विमलांबर° ; K$_4$ विमलायुध° ; B$_3$ विमलाः सुर° ; D$_1$ विमलार्कसमप्रभाः.

30 a) K$_2$ Da$_1$ D$_{5.7}$ च वर्माणि ; K$_{3.5}$ D$_{2.6}$ विचित्राणि ; D$_3$ च मर्माणि ; G$_{1-3}$ च सर्वाणि (for च चर्माणि). — c) Ś$_1$ K$_{0-2}$ महाराज (for रणे राजन्). — d) K$_{3-5}$ B$_{2-4}$ D$_{2.6}$ T$_2$ पात्य° ; Dn$_2$ यत° (for पत°). K$_4$ भारत ; T$_2$ सर्वतः (for सर्वशः). — After 30, D$_1$ ins. :

335* मेघान्तरे यथा विद्युज्ज्वलमानेव दृश्यते ।

31 D$_5$ reads 31^{ab} twice consecutively. — a) Ś$_1$ K$_{0-2.4}$ अन्योन्यं (for तेऽन्योन्यं). T$_1$ G$_{2.4}$ सैन्ये (for सेने). — b) K$_1$ (both times) युधिमाने ; D$_3$ युद्ध° ; T$_1$ वर्त° ; G$_{2-4}$ वध्य° (for युध्य°). G$_2$ नराधिपे. D$_5$ युध्यमानानि सर्वशः ; T$_2$ नराधिप महाबले. — K$_1$ *repeats* 31^{cdab}. — c) D$_1$ अशोभंत ; D$_6$ T$_2$ अशोभतां ; M$_{1.3.5}$ अशोभत. K$_1$ (second time) om. यथा. K$_{3-5}$ B Da Dn D$_{2.4-8}$ देव- ; S सेने (T$_1$ G$_4$ सैन्ये) (for दैत्य-). — d) K$_{3-5}$ B$_{2.4}$ Da Dn$_1$ D$_{5.7.8}$ -दैत्यसेने ; B$_{1.3}$ Dn$_2$ D$_{2.4.6}$ -दैत्यसैन्ये (for -देवसेने). S दे(T$_1$ G$_{3.4}$ दै)वदैत्यसमुद्यते (T$_2$ M$_4$ °मे). — ef) Ś$_1$ K$_{0.1}$ (both times) .$_2$ अभ्यवर्त(Ś$_1$ °र्तं)त ; T$_2$ नाभ्यद्रवंत ; G$_2$ अभिदुद्राव (for अभ्यद्रवन्त). M$_{1-3}$ तेन्योन्यं समरे (by transp.). B$_3$ तदान्योन्यं ; D$_4$ ते अन्योन्यं (for तेऽन्योन्यं वै). Da Dn D$_{5.8}$ च (for वै).

32 a) B$_3$ रथाश्च- (for रथास्तु). — b) D$_6$ प्रेषिताः. — c) K$_5$ Da$_1$ Dn$_2$ D$_{2.4.6-8}$ युगे (for युगैर्). Ś$_1$ D$_3$ संश्लेष्य ; K$_5$ संश्लिष्टा. — d) G$_3$ [आ]युयुत्सुः (for युयुधुः). K$_5$ भरतर्षभाः ; D$_1$ पार्थिवोत्तमाः.

33 a) D$_3$ युद्ध° (for युध्य°). — b) K$_{3.4}$ B$_{2-4}$ D$_3$ संहर्षात् ; M$_5$ संकर्षात् ; Cc संघर्षात् (as in text). — c) S दंतेभ्योपि (T$_2$ G$_2$ M$_4$ °भ्यो हि) नरश्रेष्ठ. — d) K$_2$ सभूम ; Da$_1$ साधमः ; G$_4$ सुधूमः. B$_{2.4}$ Da Dn D$_{5.7.8}$ G$_2$ सर्वतो दिशः (for °तोदिशम्).

34 a) K$_2$ प्राशैर्. K$_{0-2}$ Da$_1$ विनिहताः (K$_0$ °तः) ; K$_3$ असिहताः ; D$_1$ विमथिताः ; M$_1$ अपि हताः. — b) T$_1$ G$_4$ सादिनस्तत्र संघशः ; T$_2$ G$_{1-3}$ M तत्र यौ(T$_2$ G$_2$ यो)धाः सहस्रशः. — c) K$_3$ यतमानाः ;

C. 6. 3651
B. 6. 87. 35
K. 6. 87. 34

पतमानाः स्म दृश्यन्ते गिरिशृङ्गान्नगा इव ॥ ३४
पादाताश्चाप्यदृश्यन्त निघ्नन्तो हि परस्परम् ।
चित्ररूपधराः शूरा नखरप्रासयोधिनः ॥ ३५
अन्योन्यं ते समासाद्य कुरुपाण्डवसैनिकाः ।
शस्त्रैर्नानाविधैर्घोरै रणे निन्युर्यमक्षयम् ॥ ३६
ततः शांतनवो भीष्मो रथघोषेण नादयन् ।
अभ्यागमद्रणे पाण्डून्धनुःशब्देन मोहयन् ॥ ३७
पाण्डवानां रथाश्चापि नदन्तो भैरवस्वनम् ।
अभ्यद्रवन्त संयत्ता धृष्टद्युम्नपुरोगमाः ॥ ३८
ततः प्रववृते युद्धं तव तेषां च भारत ।
नराश्वरथनागानां व्यतिषक्तं परस्परम् ॥ ३९

इति श्रीमहाभारते भीष्मपर्वणि त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

८४

संजय उवाच ।
भीष्मं तु समरे क्रुद्धं प्रतपन्तं समन्ततः ।
न शेकुः पाण्डवा द्रष्टुं तपन्तमिव भास्करम् ॥ १
ततः सर्वाणि सैन्यानि धर्मपुत्रस्य शासनात् ।

D8 T2 पातमानाः. D2 व्य-; D6 प्र-; M1-3. 5 च (for स्म). — d) B1 गिरिशृंगानुगा; D1 °शृंगगता; G3 °शृंगा नगा. Co cites नगाः (as in text).

35 a) K0. 2 D2. 3. 6 M1. 3. 5 पदाताश्. K3 च प्रदृश्यंत; B2 D6 चापि (D6 °प्य-) दृश्यंते; D1 चैव दृश्यंते; D2. 8 T2 च व्यदृश्यंत. T1 G स व्य(G2 दृ)-दृश्यंत. — b) K0. 2 D3. 8 निघ्नतो (for निघ्नन्तो). K3. 5 B1. 2 Da2 Dn1 D2. 6 [ऽ]थ; B3 [ऽ]पि (for हि). Da1 D5 निघ्नंतास्च; D1 S विनिघ्नंतः (for निघ्नन्तो हि). — c) T1 G यो(G1-3 यौ)धाः (for शूरा). — d) D2 S परिघ- (for नखर-). Cc. d cite नखरः. G3 -यौधिनः (for -यो°).

36 c) K3. 5 D2 अस्त्रैर्; Da1 शास्त्रैर्; Dn2 D4. 7. 8 शरैर् (for शस्त्रैर्). Ś1 K0-2. 4 D1 नानाविधाकारै.

37 a) B4 D4. 7 तत्र (for ततः). — c) D1 S अभ्यद्रवद् (for अभ्यागमद्). K3. 5 D2. 6 T2 G1. 3 M पार्थान्; T1 G2. 4 पार्थं (for पाण्डून्). — d) K2 धन°; D6 धनु° (for धनुः°). K3. 5 D2 नादयन्; B2 G3 पूर°; D1 चासकृत् (for मोह°).

38 a) S तं पांडवा (T1 °वो) महाराज. — b) K2 नदंतौ. K3-5 Dn1 D2. 8 भैरवं स्वनं (K3. 5 D2 °रं); B Da Dn2 D4-8 भैरवं रवं (Da1 °णं); D1 S (G2 sup. lin.) भैरवान्नवान् (G2 orig. °वान्नृपान्) (for भैरवस्वनम्). — c) Ś1 K5 अभ्याद्रवंत; B2. 3 अभ्य-धावंत; D6 °द्रवत. K4 B1 Da Dn1 D5 संहृष्टा; S संग्रामे (for संयत्ता).

39 a) Da1 D5 प्रवर्तते (for प्रववृते). — c) K3 नराश्वनर-; B3 रथाश्वरथ-. S नराश्वरथ(T2 G2. 4 रथाश्व-नर)मातंग-. — d) Ś1 K3 B3 D2. 3 व्यतिषक्त(Ś1 °पिक्त-; D3 °षक्ताः)परस्परं; K1. 2 व्य(K1 वि)तिशक्तं पर°; D1 व्यासक्तमतितेजसां; T -प्रतियानं सुदर्शनं; G -प्रतिघातं सुदर्शनं (G1 *inf. lin.* सुदारुणं); M -प्रतिपात-(M4 °यातं)सुदर्शनं.

Colophon om. in D3. — *Sub-parvan :* Omitting sub-parvan name, Ś1 K0-2 D2 mention only अष्टमे युद्धदिवसे; K4 B3 Da Dn1 D5 T2 M1. 2 अष्टमे-ह्निके (to it B3 adds संग्रामे); D6 अष्टमंदिवसयुद्धे; T1 G4 अष्टमेहनि; M3-5 अष्टमेह्निके. — *Adhy. name :* K4 व्यूहरचना; T G2. 4 M1-3. 5 व्यूहकरणं. — *Adhy. no.* (figures, words or both): Da2 (*sec. m.*) 45; Dn2 T2 M3. 4 84; D6 T1 G 82; M1. 2 83 (as in text); M5 85. — *Śloka no. :* Dn D6 40; D5 41.

84

1 a) K5 B4 T2 भीष्मस्तु. — b) K0-3 Da1 Dn1 D1 G1 प्रपतंतं; D8 तपंतं च; T1 G4 संपतंतं; M1. 2

अभ्यद्रवन्त गाङ्गेयं मर्दयन्तं शितैः शरैः ॥ २
स तु भीष्मो रणश्लाघी सोमकान्सहसृञ्जयान् ।
पाञ्चालांश्च महेष्वासान्पातयामास सायकैः ॥ ३
ते वध्यमाना भीष्मेण पाञ्चालाः सोमकैः सह ।
भीष्ममेवाभ्ययुस्तूर्णं त्यक्त्वा मृत्युकृतं भयम् ॥ ४
स तेषां रथिनां वीरो भीष्मः शांतनवो युधि ।
चिच्छेद सहसा राजन्बाहूनथ शिरांसि च ॥ ५
विरथान्रथिनश्चक्रे पिता देवव्रतस्तव ।
पतितान्युत्तमाङ्गानि हयेभ्यो हयसादिनाम् ॥ ६
निर्मनुष्यांश्च मातङ्गाञ्शयानान्पर्वतोपमान् ।
अपश्याम महाराज भीष्मास्त्रेण प्रमोहितान् ॥ ७
न तत्रासीत्पुमान्कश्चित्पाण्डवानां विशां पते ।
अन्यत्र रथिनां श्रेष्ठाद्भीमसेनान्महाबलात् ॥ ८
स हि भीष्मं समासाद्य ताडयामास संयुगे ।
ततो निष्टानको घोरो भीष्मभीमसमागमे ॥ ९
बभूव सर्वसैन्यानां घोररूपो भयानकः ।
तथैव पाण्डवा हृष्टाः सिंहनादमथानदन् ॥ १०
ततो दुर्योधनो राजा सोदर्यैः परिवारितः ।
भीष्मं जुगोप समरे वर्तमाने जनक्षये ॥ ११
भीमस्तु सारथिं हत्वा भीष्मस्य रथिनां वरः ।

C. 6. 3838
B. 6. 83. 12
K. 6. 88. 12

आपतंतं (for प्रतपन्तं). — ^{c}) M2 पांडवान्. K1 दुष्टं; D1 सोढुं (for द्रष्टुं). — ^{d}) K5 भारत (for भास्करम्). M1–3. 5 तपंतं भास्करं यथा.

2 ^{b}) K3. 5 D2 धर्मराजस्य (for °पुत्रस्य). — ^{c}) Ś1 अभ्याद्रवंत; Da Dn D4. 5. 7. 8 अभ्यधावंत; D6 M4 °द्रवत. K5 वेगेन; Dn1 D1 T2 G1 M गांगेय; D5 गांगेये. — ^{d}) K1–3 D1 S मर्दयंतः (T1 G4 °ति); D7 अर्दयन्तं (for मर्द°). K5 शतैः (for शितैः).

3 ^{a}) K0 रणश्लाघ्यः; K1 रसाश्लाघी; K3 Da1 D2 रणे श्लाघी; D1 बलश्लाघी; G2 रथश्लाघी. — ^{b}) D1 T1 G संजयैः सह; T2 M4 सह संजयैः (for सहसृञ्जयान्). — T1 om. (hapl.) 3^{c}–4^{b}. — ^{c}) K4 B पंचालांश्च. D6 महेष्वासः. — ^{d}) K4 B4 शायकैः.

4 T1 om. 4^{ab} (cf. v. l. 3). — ^{b}) K1 B1 पंचालाः. T2 M सह पांडवैः; G पांडवैः सह. — ^{c}) D1 [अ]न्ववर्तंत; S ययुस्तूर्णं (M1–3. 5 ययुः सर्वे) (for [अ]भ्ययुस्तूर्णं). — ^{d}) D1 मृत्युभयं ततः; T3 °भयं कृतं (for °कृतं भयम्).

5 ^{a}) S रथ(T1 G4 °थि)सिंहानां (T2 °मुख्यानां) (for रथिनां वीरो). — ^{b}) B4 Dn2 D4. 7 बली (for युधि). — ^{c}) K4 B1. 2. 4 Da2 Dn2 D3–5. 7. 8 S समरे (for सहसा). — ^{d}) K5 बहूनपि (for बाहूनथ). Ś1 K1. 3 D2 अपि (for अथ). K0. 2 बहून्यपि शिरांस्यपि. — After 5, K2 reads 7^{ab}.

6 ^{a}) B3 आत्मनश् (for रथिनश्). G2 विरथं रथिनं चक्रे. — ^{c}) D6 पातितानि.

7 K2 reads 7^{ab} after 5. — ^{a}) K0. 2 T2 निमनुष्यांश्च. — ^{b}) T2 छेदयन् (for शयानान्). D3 पर्वतोत्त(*also* °प)मान्. B Da Dn D4–8 निर्वृक्षानिव (Da1 damaged) पर्वतान्. — ^{c}) T G रणे राजन् (for महाराज). — ^{d}) Ś1 D6 विमोहिताः (D6 °तान्); Da Dn1 D1. 3. 5 निपातितान्; D2 निपोथितान्; S (except G3) प्रमाथितान् (for प्रमोहितान्).

8 ^{a}) D1 तथा (for तत्र). — ^{c}) D3 अन्येन (for अन्यत्र). Da1 damaged. — ^{d}) Ś1 महारथात् (for °बलात्).

9 ^{a}) T1 G तु (for हि). — ^{b}) Da1 damaged. B2–4 Da2 Dn D4–8 वारयामास. S छादयामास सायकैः. — ^{c}) S (except T2) निष्ठानको; Cd निष्टा° (as in text). B3 ततो निष्टानके घोरे. — ^{d}) K4 T2 G1–3 M भीष्म(G1. 3 °म-; G2 °ष्मो)भीमपराक्रमे; T1 G4 भीष्मो भीमपराक्रमः.

अमलो निर्मलः सूक्ष्मः सर्वव्यापी निरञ्जनः ॥ (४२) [85]

अर्जुन उवाच ।

अक्षराणि समात्राणि सर्वे बिन्दुसमाश्रिताः ।
बिन्दुर्भिद्यति नादेन स नादः केन भिद्यते ॥ (४३)

श्रीभगवानुवाच ।

ॐकारध्वनिनादेन वायुः संहरणान्तिकम् ।
निरालम्बस्तु निर्देहो यत्र नादो लयं गतः ॥ (४४)

अर्जुन उवाच ।

बाह्येन व्यापितं व्योम व्योम चानवुनासिकम् । [90]
अधश्चोर्ध्वं कथं चैव कण्ठे चैव निरञ्जनः ॥ (४५)

श्रीभगवानुवाच ।

अनूष्ममव्यञ्जकमस्वरं य-
त्तत्तालुकण्ठेष्वनुनासिकं च ।
अरेफजातं शुभमूष्मवर्जितं
न दुष्कराणां कुरुते कदाचित् ॥ (४६) [95]

आकाशमप्यनाकाशं पुरुषत्वे प्रतिष्ठितम् ।
शब्दं गुणमिवाकाशं निःशब्दं ब्रह्म चोच्यते ॥ (४७)
सर्वगं सर्वबोधादि वासनाजालवर्जितम् ।
इन्द्रियाणां निरोधेन देहे पश्यन्ति मानवाः ॥ (४८)
देहे नष्टे कुतो बुद्धिर्ज्ञानं विज्ञानमेव च । [100]
ज्ञानं विज्ञानयुक्तं च रक्षणीयं प्रयत्नतः ॥ (४९)

छिन्नमूलस्य वृक्षस्य यथा जन्म न विद्यते ।
ज्ञानदग्धशरीरस्य पुनर्देहो न विद्यते ॥ (४५, ५०)
गीताः सुगीताः कर्तव्याः किमन्यैः शास्त्रसंग्रहैः ।
याः पुरा पद्मनाभस्य मुखपद्माद्विनिःसृताः ॥ (४६, ५१) [105]

गीतागाङ्गोदकं पीत्वा पुनर्जन्म न विद्यते ।
सर्वशास्त्रमयी गीता सर्वधर्ममयो हरिः ॥ (४७, ५२)
सर्वतीर्थमयी गङ्गा सर्वपापक्षयंकरी ।
सर्वभोगमयश्चायं सर्वमोक्षमयो ह्ययम् ॥ (४८, ५३)

---

left) Ś3 भिन्न° (for छिन्न°). — (L. 80, left) Ś3 जीविना (for जीविनः). — (L. 87, left) Ś1 निष्कलं and स्वभावोद्भावं. — (L. 88, left) Ś1 तालुं मध्ये च (for तालुमूले च). — (L. 76, right) K9 अमात्रा° (for अमात्र°). — (L. 79, right) K9 नैव (for न च). — (L. 80, right) K1 पुरा (for सुरः). K1. 2. 9 प्रोक्तं (for प्रोक्तो). — (L. 82, right) स नावार्थी (for ना नावार्थी). — (L. 83, right) K9 परं (for परे). — (L. 84, right) K0 पितृवर्जितः (for पिण्ड°). — (L. 91) K9 सर्वव्यापी (for कण्ठे चैव). — (L. 92) K0–2 अघोषम् (for अनूष्मम्). — (L. 94) K0–2 शुभमोष° (for शुभमूष्म°). — (L. 97) K9 शब्दगुणम् (for शब्दं गुणम्). — (L. 99) K1. 2 नि(K1 वि)बोधेन (for निरोधेन). — (L. 101) K0 ज्ञानविज्ञान° (for ज्ञानं वि°). — (L. 102) Ś3 मूलांतस्तस्य मंत्रो (for वृक्षस्य यथा जन्म). — Ś1. 3 om. (hapl.) lines 104–106.

गीता गङ्गा च गायत्री गोविन्दो हृदि संस्थिताः ।
चतुर्गकारसरणात्पुनर्जन्म न विद्यते ॥ (४९)
गीतासारं पठेद्यस्तु ह्यच्युतस्य च संनिधौ ।
तस्माद्गुणसहस्रेण विष्णोर्निर्वचनं यथा ॥ (५०)

गकारपूर्वाश्चत्वारो रक्षन्ति महतो भयात् । [110]
गीता गङ्गा च गायत्री गोविन्दो हृदि संस्थिताः ॥ (५४)
स्नातो वा यदि वास्नातः शुचिर्वा यदि वाशुचिः ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरे शुचिः ॥ (५५)
स गच्छेत्तत्क्षणात्प्रायो ब्रह्ममूर्तं नमोऽस्तु ते ।
गीतासारं पठेद्यस्तु विष्णुलोके महीयते ॥ (५६) [115]

एतत्पुण्यं पापहरं धन्यं दुःस्वप्ननाशनम् ।
पठतां शृण्वतां चैव विष्णोर्माहात्म्यमुत्तमम् ॥ (५१, ५७)

इति श्रीमहाभारते भीष्मपर्वणि गीतासारः समाप्तः ॥

4

B3.4 Da D4.5 ins. after 6. 45. 43^{cd}: Dn (transp. lines 9–18 after line 46) ins. after 6. 45. 43^{ab}: M3-5 (all om. lines 1–6, and 288–339) ins. after 6. 45. 46:

श्वेतः क्रोधात्प्रजज्वाल हविषा हव्यवाडिव ।
स विस्फार्य महच्चापं शक्रचापोपमं बली ।
अभ्यधावज्जिघांसन्वै शल्यं मद्राधिपं बली ।
महता रथवंशेन समन्तात्परिवारितः ।
मुञ्चन्बाणमयं वर्षं प्रायाच्छल्यरथं प्रति । [5]
तमापतन्तं संप्रेक्ष्य मत्तवारणविक्रमम् ।
तावकानां रथाः सप्त समन्तात्पर्यवारयन् ।
मद्रराजमभीप्सन्तो मृत्योर्दंष्ट्रान्तरं गतम् ।
बृहद्बलश्च कौसल्यो जयत्सेनश्च मागधः ।
तथा रुक्मरथो राजञ्शल्यपुत्रः प्रतापवान् । [10]
विन्दानुविन्दावावन्त्यौ काम्बोजश्च सुदक्षिणः ।
बृहत्क्षत्रस्य दायादः सैन्धवश्च जयद्रथः ।
नानावर्णविचित्राणि धनूंषि च महात्मनाम् ।
विस्फारितानि दृश्यन्ते तोयदेष्विव विद्युतः ।
ते तु बाणमयं वर्षं श्वेतमूर्धन्यपातयन् । [15]
निदाघान्तेऽनिलोद्धूता मेघा इव नगे जलम् ।
ततः क्रुद्धो महेष्वासः सप्तभल्लैः सुतेजनैः ।
धनूंषि तेषामाच्छिद्य ममर्द पृतनापतिः ।
निकृत्तान्येव तानि स्म समदृश्यन्त भारत ।
ततस्ते तु निमेषार्धात्प्रत्यपद्यन्धनूंषि च । [20]
सप्त चैव पृषत्कांश्च श्वेतस्योपर्यपातयन् ।

—(L. 103) Ś3 पुनर्जन्म (for पुनर्देहो). —(L. 106) Ko.1 गीतां (for गीता-). K2 °गंगोदकं. —(L. 107) K9 सर्वधर्ममयी मता (for the post. half.). — Ko-2.9 om. (hapl.) line 108. —(L. 109) Ko-2 सर्वभोग° (for सर्वमोक्ष°). —(L. 110, right) Ś1.3 Ko °पूर्वांच्च° (for °पूर्वांश्च°). —(L. 113, right) Ko बहिः (for शुचिः). — Ś1.3 om. lines 112–113 (both right) and 114–115; while Ko-2.9 om. lines 112–113 (both left). — Lines 116–117 are found in Ko-2 only. — Colophon: K2 इति भीष्मपर्वणि गीतासारः समाप्तं; K9 भीष्मपर्वणि गीतासारः समाप्तः.

4

(L. 1) B1 शंखः (for श्वेतः). Dn श्वेतः सप्त महावीरान्दृष्ट्वा क्रोधसमन्वितः. —(L. 2) B3 Da D5 कार्तस्वरविभूषितं; B1 देवदानवपूजितं (for the post. half). Dn धनूंषि तेषां चिच्छेद बाणैः संनतपर्वभिः. — Dn om. lines 3–6. —(L. 3) B3.4 तु (for वै). B3 D4 युधि (for बली). B1 शल्यं सेनापतिः स्वयं (for the posterior half). —(L. 4) D4 रथवेगेन (for °वंशेन). Da1 परिवारयन् (for °वारितः). — Da1 om. lines 5–7. —(L. 5) B3 Da2 D4.5 सृजन् (for मुञ्चन्). —(L. 8) B3 Da D4.5 परीप्संतो (for अभीप्सन्तो). —(L. 9) B3 Da D4.5 कौशल्यो; B1 कौरव्यो (for कौसल्यो). —(L. 10) M3-5 शूरः (for राजन्). B1 Da1 D4 राजपुत्रः (for शल्यपुत्रः). M3-5 पुत्रः शल्यस्य मानिनः (for the posterior half). —(L. 11) Da D5 बिंदानुविंदा°. —(L. 12) M3-5 बृद्ध- (for बृहत्-). M5 दायादाः. B3 सिंधुराजो; Da2 D5 सैंधवस्य; M5 D4 सैंधवाश्च. —(L. 13) B3 नानावाणविचित्राणि; D4 नानाधातु°; M3-5 नानारत्न°. B3.4 Da1 D4 M3-5 कार्मुकानि (B3.4 °णि) (for धनूंषि च). —(L. 14) M3.4 विष्फारितानि. M3-5 [अ]दृश्यंत (for दृश्यन्ते). Da1 विष्णुरिति निदृश्यंते (for the prior half). —(L. 15) M3 तत; M4.5 तं (for ते). D5 स- (for तु). — M3-5 om. line 16. —(L. 17) B3 सप्त बाणान्सुतेजितान्; M3-5

ततः पुनरमेयात्मा भल्लैः सप्तभिराशुगैः ।
निचकर्त महाबाहुस्तेषां चापानि धन्विनाम् ।
ते निकृत्तमहाचापास्त्वरमाणा महारथाः ।
रथशक्तीः परामृश्य विनेदुर्भैरवान्रवान् । [25]
अन्वयुर्भरतश्रेष्ठ सप्त श्वेतरथं प्रति ।
ततस्ता ज्वलिताः सप्त महेन्द्राशनिनि स्वनाः ।
अप्राप्ताः सप्तभिर्भल्लैश्चिच्छेद परमास्त्रवित् ।
ततः समादाय शरं सर्वकायविदारणम् ।
प्राहिणोद्भरतश्रेष्ठ श्वेतो रुक्मरथं प्रति । [30]
तस्य देहे निपतितो बाणो वज्रातिगो महान् ।
ततो रुक्मरथो राजन्सायकेन दृढाहतः ।
निषसाद रथोपस्थे कश्मलं चाविशन्महत् ।
तं विसंज्ञं विमनसं त्वरमाणस्तु सारथिः ।
अपोवाह सुसंभ्रान्तः सर्वलोकस्य पश्यतः । [35]
ततोऽन्यान्षट् समादाय श्वेतो हेमविभूषितान् ।
तेषां षण्णां महाबाहुर्ध्वजशीर्षाण्यपातयत् ।
हयांश्च तेषां निर्भिद्य सारथींश्च परंतप ।
शरैश्चैतान्समाकीर्य प्रायाच्छल्यरथं प्रति ।
ततो हलहलाशब्दस्तव सैन्येषु भारत । [40]
दृष्ट्वा सेनापतिं तूर्णं यान्तं शल्यरथं प्रति ।
ततो भीष्मं पुरस्कृत्य तव पुत्रो महाबलः ।
वृतस्तु सर्वसैन्येन प्रायाच्छ्वेतरथं प्रति ।
मृत्योरास्यमनुप्राप्तं मद्रराजममोचयत् ।
ततो युद्धं समभवत्तुमुलं लोमहर्षणम् । [45]
तावकानां परेषां च व्यतिषक्तरथद्विपम् ।
सौभद्रे भीमसेने च सात्यकौ च महारथे ।
कैकेये च विराटे च धृष्टद्युम्ने च पार्षते ।
एतेषु नरसिंहेषु चेदिमत्स्येषु चैव ह ।
ववर्ष शरवर्षाणि वृद्धः कुरुपितामहः । [50]

Colophon.

धृतराष्ट्र उवाच ।

एवं श्वेते महेष्वासे प्राप्ते शल्यरथं प्रति ।
कुरवः पाण्डवेयाश्च किमकुर्वत संजय ।

सप्त महान्सुवा(M5 °न्स पू)जितान् (for the post. half). D4 श्वेतः सप्त महावीरान्दृष्ट्वा क्रोधसमन्वितः (cf. v. l. line 1). — (L. 18) M3-5 उद्दिश्य व्यसृजत् (for आच्छिद्य ननर्द). D4 धनूंषि तेषां चिच्छेद बाणैः संनतपर्वभिः. — (L. 20) M3. 4 ततोन्ये तु ; M5 ततोन्यानि (for ततस्ते तु). Da D5 निमेषाद्धि (for °पार्थात्). Da D5 प्रत्यपद्य ; Dn D4 प्रतिपद्य ; M4. 5 प्रत्यगृह्णन् (for °पद्यन्). M3-5 ते (for च). — (L. 21) M3-5 सप्त (for चैव). Da श्वेतस्यो- पर्यपातयत् ; M3-5 श्वेतस्योरस्य(M4 °सि)पातयन्. — (L. 23) B4 निश्चकर्त ; Dn2 D5 विनकर्त. — (L. 24) M3-5 तेपि (for ते नि-). Dn D4 स्फुरमाणा (for त्वर°). — (L. 25) Da1 Dn D4 अथ शक्तीः ; M3. 5 शरशक्तीः (for रथ°). Dn1 निनेदुर्. B4 स्वरान् (for रवान्). — (L. 26) B3. 4 Dn D4 मुमुचुर् (for अन्वयुर्). M3-5 मुमुचुस्ते नरश्रेष्ठाः (for the prior half). — (L. 27) B3 Dn D4 M4. 5 महोल्का° (for महेन्द्रा°). — (L. 28) B3 तीक्ष्णाग्राः ; Da1 सवेगैः (for अप्राप्ताः). M3-5 चिच्छेद सुरथासुतः. — (L. 29) Da D5 समाध्याय (for समादाय). M3-5 ततः शरं समाधाय (for the prior half). Da1 ......दारणं ; Da2 D5 सर्वकायावदारणं. — (L. 30) M3-5 क्रुद्धो (for श्वेतो). Da1 सदरथं (for रुक्म°). — B4 om. line 31. — (L. 31) M3-5 तस्यांसदेशे न्यपतद् (for the prior half). Dn1 D4 वज्रातिगो. M3-5 बाणोथ दृढवेधिनः (M4 °धन्विनः ; M5 °वेदिनः). — (L. 32) B4 भंक्त्वा (for ततो). M3-5 राजा (for राजन्). Dn D4 दृढं हतः ; M3. 5 समाहितः ; M4 समाहतः (for दृढाहतः). — (L. 33) M3-5 कश्मलं च समाविशत्. — (L. 35) Dn D5 अपोवाहलब्धसंज्ञः ; M3. 5 अपावहदसंभ्रांतः. — (L. 36) Dn D4 श्वेतो (for ततो). Da2 D5 स (for षट्). M3-5 समाधाय शरान् (for समादाय श्वेतो). Dn D4 वाजिनो हेमभूषितान् ; M3 श्वेतो हेमविभूषणान्. — (L. 37) B3 चैव (for षण्णां). B3 M3-5 महाराज (for °बाहुर्). B4 ध्वजसीमाम् (for °शीर्षाणि). — (L. 38) Dn D4 (before corr.) शेषान् (for तेषां). B4 तेषां तु षण्णां निर्भिद्य (for the prior half.). Da1 M3. 4 परंतपः. — (L. 39) Dn चैनान् (for चैतान्). M3-5 वी(M4 धी)रश्चान्यान्समाचाल्य (for the prior half). — (L. 40) Da D5 तत्र (for तव). M3-5 तव सैन्यस्य मारिष (for the posterior half). — (L. 42) M3-5 महारथः (for °बलः). — (L. 43) Dn D4 च (for तु). M3-5 वृतः सर्वेण सैन्येन. Dn शल्यरथं (for श्वेत°). — (L. 44) B4 ततस्तं समनुप्राप्तं ; M4. 5 मृत्योर्वं(M5 °वं)शमनुप्राप्तं. B3. 4 अचोदयत् ; Da D5 उपागमत् ; M3-5 व्यमोचयत्. — (L. 45) M3-5 रोमहर्षणं. — M3. 5 om. line 46. — (L. 47) M3-5 सात्यके. — (L. 48) D4 कैकये ; M4 केकये. — (L. 49) Dn D4 चेदिसैन्येषु. B3 Dn1 हि (for ह). B4 युध्यत्सु निनदत्सु च ; M3-5 चेदिमत्स्यक(M4 °कु)रूषिषु. — Colophon. *Adhy. no.:* Da3 5 ; Dn2 45 ; D5 47 ; M3-5 46.

After line 51, M3-5 ins.:

प्रत्युद्याते च गाङ्गेये तथा श्वेतरथं प्रति ।

भीष्मः शांतनवः किं वा तन्ममाचक्ष्व पृच्छतः ।
संजय उवाच ।
राजञ्शतसहस्राणि ततः क्षत्रियपुंगवाः ।
श्वेतं सेनापतिं शूरं पुरस्कृत्य महारथाः । [55]
राज्ञो बलं दर्शयन्तस्तव पुत्रस्य भारत ।
शिखण्डिनं पुरस्कृत्य त्रातुमैच्छन्महारथाः ।
अभ्यवर्तन्त भीष्मस्य रथं हेमपरिष्कृतम् ।
जिघांसन्तं युधां श्रेष्ठं तदासीत्तुमुलं महत् ।
तत्तेऽहं संप्रवक्ष्यामि महावैशसमच्युत । [60]
तावकानां परेषां च यथा युद्धमवर्तत ।
तत्राकरोद्रथोपस्थाञ्शून्याञ्शांतनवो बहून् ।
प्राकृन्तदुत्तमाङ्गानि शरैरार्छद्रथोत्तमान् ।
समावृणोच्छरैरर्कमर्कतुल्यप्रतापवान् ।
नुदन्समन्तात्समरे रविरुद्यन्यथा तमः । [65]
तेनाजौ प्रेषिता राजञ्शराः शतसहस्रशः ।
क्षत्रियान्तकराः संख्ये महावेगा महाबलाः ।
शिरांसि पातयामासुर्वीराणां शतशो रणे ।
गजान्कण्टकसंनाहान्वज्रेणेव शिलोच्चयान् ।
रथा रथेषु संसक्ता व्यदृश्यन्त विशां पते । [70]
एके रथं पर्यवहंस्तुरगाः सतुरंगमम् ।
युवानं निहतं वीरं लम्बमानं सकार्मुकम् ।
उदीर्णाश्च हया राजन्वहन्तस्तत्र तत्र ह ।
बद्धखड्गनिषङ्गाश्च विध्वस्तशिरसो हताः ।
शतशः पतिता भूमौ वीरशय्यासु शेरते । [75]
परस्परेण धावन्तः पतिताः पुनरुत्थिताः ।
उत्थाय च प्रधावन्तो द्वंद्वयुद्धमवाप्नुवन् ।
पीडिताः पुनरन्योन्यं लुठन्तो रणमूर्धनि ।
सचापान्सनिषङ्गांश्च जातरूपपरिष्कृतान् ।
विस्रब्धहतवीरांश्च शतशः परिपीडिताः । [80]
तेन तेनाभ्यधावन्त विसृजन्तश्च भारत ।
मत्तो गजः पर्यवर्तद्धयांश्च हतसादिनः ।
सरथा रथिनश्चापि विमृद्नन्तः समन्ततः ।
स्यन्दनादपतत्कश्चिन्निहतोऽन्येन सायकैः ।
हतसारथिरप्युच्चैः पपात काष्ठवद्रथः । [85]
युध्यमानस्य संग्रामे व्यूढे रजसि चोत्थिते ।
धनुःकूजितविज्ञानं तत्रासीत्प्रतियुध्यतः ।

— (L. 52) M3–5 पांडवा(M5 °व)श्चैव (for पाण्डवेयाश्च). Da1 M3.4 किमकुर्वत . — M3–5 om. line 53. — (L. 54) M3–5 क्षत्रियाणां महाहवे (for the posterior half). — (L. 55) Da1 श्वेत- (for श्वेतं). Dn D4 शूराः. M3–5 महारथं. — (L. 56) B3.4 Da D5 मर्दयंतस् (for दर्श°). M3–5 वर्धयंतो बलं राज्ञः (for the prior half). M3–5 कुंती- (for तव). — M3–5 om. line 57. D4 transp. lines 57 and 58. — (L. 58) Da D5 °परिस्कृतं. — M3–5 om. line 59. — (L. 59) B3.4 Dn D4 जिघांसंतो. — (L. 60) Dn D4 अद्भुतं (for अच्युत). M3–5 यथा (M4 महा-) वैशसमुद्यतं. — (L. 62) M3–5 शूराञ्शांतनवो बली (for the posterior half). — (L. 63) D4 M3–5 प्राकृंतन्. Da D5 तत्राद्भुतं तूत्तमांगं. Da Dn1 D5 अर्छद् (for आर्छद्). B3 रथोत्तमैः; B4 रथोत्तमः. Dn2 D4 शरैरर्छे(D4 °र्दे)न्रथोत्तमः. — (L. 64) M3–5 अपावृणोच् (for समा°), and अर्करश्मिसमप्रभैः (for the posterior half). — (L. 65) B3 नंदन्; Da Dn D4 तुदन् (for नुदन्). M3–5 सपत्नान् (for समन्तात्). — For lines 66–70, M3–5 subst. :

तेन स्म मुक्ता इषवो यमदूता इवाहवे ।
हरन्ति क्षत्रियाञ्शूरान्मृत्युलोकाय भारत ।
प्रापतन्त स्म दृश्यन्ते गिरिशृङ्गादिव द्रुमाः ।
शिरोभिरर्धोन्मथितैर्हतसारथयस्तथा ।
वीरा रथेन संसक्ताः [M5 संयुक्ताः] प्रत्यदृश्यन्त भारत ।

— (L. 68) B3 Dn D4 पातयामास शू(B3 वी)राणां (for the prior half), and शिरांसि (for वीराणां). — (L. 69) Da D5 गजान्कर्कटसन्नाहान्; Dn1 राजन्कंककटाश्चैव; Dn2 D4 राजन्कंटकसन्नद्धा. Dn D4 वीरा विगतमस्तकाः (for the posterior half). — (L. 71) B3.4 Dn2 D4 M3–5 एको; Da1 एक-. B4 M3–5 पर्यवहत्; Dn2 D4 °वर्तत् (for °वहंस्). B4 तुरंगोन्यांस्तुरंगमः; Dn D4 तुरंगोन्यस्तुरंगमं; M3–5 रथशेपस्तुरंगमं. — (L. 72) Dn D4 स्वबलं (for युवानं). M3–5 च हतं (for निहतं). — (L. 73) Dn D4 अवहंश्च (Dn2 अवहंतस्; D4 आवहंतस्) ततस्ततः; M3.4 व(M5 स)हंतो विहतान्रथान् (for the posterior half). — B3.4 Da D5 M3–5 om. lines 74–78. — Dn D4 om. 79–81. — (L. 79) B3.4 सुचापान्. B3.4 सुनिषंगांश्च; Da D5 सनिषंगाश्च. Da D5 जातरूपपारिस्कृतान्. — (L. 80) B3 विध्यतहतवीराश्च; B4 विध्वस्तहत°; M3–5 वित्रस्ता हत°. B4 शरपीडिताः; Da2 परपीडिताः. M3–5 सशल्याः शरविक्षताः (for the posterior half). — (L. 81) M3–5 तेन तेने(M4 °नै)व धावंतः समदृश्यंत भारत. — (L. 82) Dn M3–5 पर्यपतत् (for °वर्तत्). Dn D4 हतसारथिनो हयाः; M3–5 हतसादिः शरार्दितः (for the posterior half). — M3–5 om. lines 83–93. — (L. 83) Da1 Dn1 विमर्दंतः (for विमृद्नन्तः). — (L. 84) B3.4 Da D5 द्विरदः स्यंदनस्तेन पपातै(Da2 D5 पुमाने)केषुणा हतः. — B3.4 Da D5 om. lines 85–91. — (L.

गात्रस्पर्शेन योधानां व्यज्ञास्त परिपन्थिनम् ।
युध्यमानं शरै राजन्सिञ्जिनी ध्वजिनी रवात् ।
अन्योन्यं वीरसंशब्दो नाश्रूयत भटैः कृतः । [90]
शब्दायमाने संग्रामे पटहे कर्णदारिणि ।
युध्यमानस्य संग्रामे कुर्वतः पौरुषं स्वकम् ।
नाश्रौषीन्नामगोत्रोक्तिं कीर्तनं च परस्परम् ।
भीष्मचापच्युतैर्बाणैरार्तानां युध्यतां मृधे ।
परस्परेषां वीराणां मनांसि समकम्पयन् । [95]
तस्मिन्नत्याकुले युद्धे दारुणे लोमहर्षणे ।
पिता पुत्रं च समरे नाभिजानाति कश्चन ।
चक्रे भग्ने युगे छिन्ने एको धुर्यो हयो हतः ।
आक्षिप्तः स्यन्दनाद्वीरः ससारथिरजिह्मगैः ।
एवं च समरे सर्वे वीराश्च विरथीकृताः । [100]
तेन तेन स्म दृश्यन्ते धावमानाः समन्ततः ।
गजो हतः शिरश्छिन्नं मर्म भिन्नं हयो हतः ।
अहतः कोऽपि नैवासीद्भीष्मे निघ्नति शात्रवान् ।
श्वेतः कुरूणामकरोत्क्षयं तस्मिन्महाहवे ।
राजपुत्राञ्रथोदारानवधीच्छतसंघशः । [105]
चिच्छेद रथिनां बाणैः शिरांसि भरतर्षभ ।
साङ्गदा बाहवश्चैव धनूंषि च समन्ततः ।
रथेषां रथचक्राणि तूणीराणि युगानि च ।
छत्राणि च महार्हाणि पताकाश्च विशां पते ।
हयौघाश्च रथौघाश्च नरौघाश्चैव भारत । [110]
वारणाः शतशश्चैव हताः श्वेतेन भारत ।
वयं श्वेतभयाद्भीता विहाय रथसत्तमम् ।
अवशिष्टास्तथा पश्चाद्विभुं पश्याम शृण्वतः ।
शरपातमपक्रम्य कुरवः कुरुनन्दन ।
भीष्मं शांतनवं युद्धे स्थिताः पश्याम सर्वशः । [115]
अदीनो दीनसमये भीष्मोऽस्माकं महाहवे ।
एकस्तस्थौ नरव्याघ्रो गिरिर्मेरुरिवाचलः ।
आददान इव प्राणान्सविता शिशिरात्यये ।
गभस्तिभिरिवादित्यस्तस्थौ शरमरीचिमान् ।

---

85) Dn1 D4 भुवि काष्ठवत (for काठवद्रथः). — (L. 88) Dn1 D4 परिपंथिनां. — (L. 92) B3.4 Da D5 यच्छतः पौरुषं तथा (for the posterior half). — B3.4 Da D5 om. line 93. — (L. 94) B3.4 Da D5 M3–5 भीष्मचापच्युतेनार्ता (M3–5 °र्तो) युध्यमाना (M3–5 °नो) महाहवे. — (L. 95) M4.5 पतन्परेषां. — (L. 96) Da D5 राजकुले ; Dn निराकुले ; D4 नराकुले ; M3–5 कालयुते (for अत्याकुले). Da Dn D4.5 M3–5 तुमुले (for दारुणे). M3.4 रोमहर्षणे. — (L. 97) B4 पुत्रश्च ; M3–5 स पुत्रं (for पुत्रं च). Dn D4 पिता स्वमौरसं पुत्रं (for the prior half). M3–5 भारत (for कश्चन). — (L. 98) B3.4 Dn D4 M3–5 चक्रं भग्नं युगं छिन्नं (Dn D4 चैव). B3.4 Da D5 एकधुर्यो. Dn D4 रथो (for हयो). — (L. 99) M3–5 प्रक्षिप्तस्यंदनो (M4 °नाद्) वीरः. — (L. 100) Da1 विधुरे च रणे घोरे ; Da2 D5 विधुरे च रथे भग्ने ; Dn D5 विधुरे भिन्नचक्रे च ; M3–5 विवीराश्च रथा राजन् (for the prior half). Dn D4 रथे च विक्लशे (Dn2 °शी- ; D4 शिथिली-) कृते (for the posterior half). — (L. 101) Dn D4 बाधमानाः परस्परं (for the post. half). — (L. 102) B3 हयः ; Da2 D5 गतः (for the first हतः). B3 Da1 छिन्नो. Dn D4 यो हतः शिरसा छिन्नो ; D5 गजो गतशिरश्छिन्नं. M3–5 वर्म (for मर्म). B3 भिन्नो. Dn D4 मर्मनिर्निहतो हतः ; D5 मर्म भिन्नं हते रणे. — (L. 103) B3 इति बाणैर्विसंत्रेषुः ; B4 Da D5 इति बाणैर् (Da1 राजानश्च) विसृष्टैस्तु ; M3–5 इति बाणाः प्रसृष्टाः स्म (for the prior half). M3–5 भीष्मेण घ्नंति शात्रवान्. — (L. 104) M3.5 श्वेतं. B3.4 क्रूरं ; Da D5 क्रुद्धे (for स्वयं). M3.5 तथैव क्षयमाहवे (for the posterior half). — (L. 105) B3.4 Da Dn D4.5 तथोदारान् (for रथोदा°). B3 अवधीच्छतशो रणे ; M3–5 अवधीत्स सहस्रशः. — (L. 106) Dn D4 शतसंघशः (for भरतर्षभ). — (L. 107) Dn2 बाहनैश् (for बाहवश्). M3.5 चापि (for चैव). M3–5 सहस्रशः (for समन्ततः): — (L. 108) Dn D4 रथिनो (for रथेषां). Dn2 तुनाराणि (for तूणीराणि). Dn2 रथानि च ; M3–5 च चामरान् (for युगानि च). — (L. 109) Dn D4 क्षुद्राणि (for छत्राणि). Dn1 पताकांश्च. M3–5 निपातिताः (for विशां पते). — (L. 110) M3–5 नरौ° (for रथौ°). Dn D4 चेति (for चैव). M3–5 गजौघाश्च विशां पते (for the posterior half). — (L. 111) B3.4 Da D5 चापि (for चैव). M3–5 सर्वं (M5 सप्त) एव रणे बाणैर् (for the prior half). B3.4 Dn D4 संयुगे ; M3–5 मारिष (for भारत). — (L. 112) Dn2 M3.5 °हयाद् (for °भयाद्). Dn D4 रथमुत्तमं. — (L. 113) B3.4 अवनृ(B4 °सृ)ष्टास् ; Dn अपसृतास् ; D4 व्यसृताश्च (for अवशिष्टास्). M3–5 अपहृष्टास्ततः पश्चाद्. D5 वै धूनं (for शृण्वतः). Dn D4 यत्र पश्याम ते धुरं ; M3–5 विमनो न प्रधिष्णुम (for the posterior half). — (L. 114) B3.4 अतिक्रम्य (for अप°). — (L. 115) M3–5 सर्वतो ददृशुः स्थितं (for the posterior half). — (L. 116) M3–5 स हीनो हीनसंमोहो भीष्मोस्माभिर्वृतो रणे. — (L. 117) Dn1 तथा (for तस्थौ). Da D5 नरव्याघ्र. M4 इवाचलं. — (L. 118) M3–5 आददानो द्विपद्मानाञ्शरैराशीविषोपमैः.

स मुमोच महेष्वासः शरसंघाननेकशः । [120]
निघ्नन्नमित्रान्समरे वज्रपाणिरिवासुरान् ।
ते वध्यमाना भीष्मेण प्रजहुस्तं महाबलम् ।
स्वयूथादिव ते यूथान्मुक्तं भूमिषु दारुणम् ।
तमेकमुपलभ्यैको हृष्टः पुष्टः परंतप ।
दुर्योधनप्रिये युक्तः पाण्डवान्परिशोचयन् । [125]
जीवितं दुस्त्यजं त्यक्त्वा भयं च सुमहाहवे ।
पातयामास सैन्यानि पाण्डवानां विशां पते ।
प्रहरन्तमनीकानि पिता देवव्रतस्तव ।
दृष्ट्वा सेनापतिं भीष्मस्त्वरितः श्वेतमभ्ययात् ।
स भीष्मं शरजालेन महता समवाकिरत् । [130]
श्वेतं चापि तथा भीष्मः शरौघैः समवाकिरत् ।
तौ वृषाविव नर्दन्तौ मत्ताविव महाद्विपौ ।
व्याघ्राविव सुसंरब्धावन्योन्यमभिजघ्नतुः ।
अस्त्रैरस्त्राणि संवार्य ततस्तौ पुरुषर्षभौ ।
भीष्मः श्वेतश्च युयुधे परस्परवधैषिणौ । [135]

एकाह्ना निर्दहेद्भीष्मः पाण्डवानामनीकिनीम् ।
शरैः परमसंक्रुद्धो यदि श्वेतो न पालयेत् ।
पितामहं ततो दृष्ट्वा श्वेतेन विमुखीकृतम् ।
प्रहर्षं पाण्डवा जग्मुः पुत्रस्ते विमनाभवत् ।
ततो दुर्योधनः क्रुद्धः पार्थिवैः परिवारितः । [140]
ससैन्यः पाण्डवानीकमभ्यद्रवत संयुगे ।
दुर्मुखः कृतवर्मा च कृपः शल्यो विशां पते ।
भीष्मं जुगुपुरासाद्य तव पुत्रेण चोदिताः ।
दृष्ट्वा तु पार्थिवैः सर्वैर्दुर्योधनपुरोगमैः ।
पाण्डवानामनीकानि वध्यमानानि संयुगे । [145]
श्वेतो गाङ्गेयमुत्सृज्य तव पुत्रस्य वाहिनीम् ।
नाशयामास वेगेन वायुर्वृक्षानिवौजसा ।
द्रावयित्वा चमूं राजन्वैराटिः क्रोधमूर्छितः ।
आपतत्सहसा भूयो यत्र भीष्मो व्यवस्थितः ।
तौ तत्रोपगतौ राजञ्शरदीप्तौ महाबलौ । [150]
अयुध्येतां महात्मानौ यथोभौ वृत्रवासवौ ।

— (L. 119) B3 Da शरमरीचिवान्; Dn D4 हेममरीचिमान्; D5 शरमहाहवे. — (L. 120) B4 अशेषतः; M3–5 सहस्रशः (for अनेकशः). — (L. 121) M3–5 न्यघ्नन्सपत्नान्समरे. Dn D4 चक्रपाणिर्. — (L. 122) M3–5 हन्यमाना (for वध्य°). B3. 4 Dn1 (before corr.) महाहवे; Dn D4 °हवं (for °बलम्). M3–5 प्रजग्मुः श्वेतमाहवे. — (L. 123) Dn D4 स्व(D4 अ)यूथा°. M3–5 यूथा यूथपतिं मत्तं (for the prior half). B3. 4 मु(B3 शु)क्तो भूमिपदारुणः; Dn D4 मुक्ता निमिषदारुणाः; M3–5 निर्यूथ (M4 °था) इव वारणः (M4 °णाः). — (L. 124) Da D5 तमेवम्. M3–5 सबलश्च (for उपलभ्य). Da D5 हृष्टपुष्टः; M3 हृष्टं हृष्टः; M4 हृष्टं हृष्टं; M5 हृष्टहृष्टः (for हृष्टः पुष्टः). — (L. 125) Da D5 दुर्योधनप्रियेत्युक्तः; D4 °प्रियो युक्तः; M3. 5 °प्रिये सक्तः; M4 °प्रिये सक्तं. Da Dn D4. 5 बहु शोच(Dn D4 °प)यन् (for परि°). M3–5 पांडवैर्बहुशो वृतः (for the posterior half). — (L. 126) Da1 दुस्सजं; Dn1 D4 दुःस्थितं (for दुस्त्यजं). Da D5 स महाहवे. — (L. 127) M3–5 नाशयामास (for पातया°). M3. 5 पांडवानि. — Da D5 om. line 128. — (L. 128) M4. 5 प्रदहंतम् (for प्रहरन्तम्). M3–5 कौरवाणां पितामहः (for the posterior half). — (L. 129) M3–5 शूरं (for भीष्मस्). Da D5 त्वरितः स समभ्ययात्; Dn D4 वेगितः सन्समभ्य°; M3–5 भीष्मस्त्वरितमभ्य°. — B3 D5 om. line 131. — (L. 131) M3–5 शरैस्तीक्ष्णैरवाकिरत् (for the posterior half). — (L. 132) M3–5 महागजौ (for °द्विपौ). — (L. 133) B3 °धावतः (for °जघ्नतुः). — (L. 134) M3–5 शस्त्रैः शस्त्राणि संवार्य त्वस्त्रैरस्त्राणि चापि भोः. — (L. 135) M3–5 युध्येतां परस्परजयैषिणौ. — (L. 136) M3–5 एकेनाह्ना दहेद्भीष्मः (M4 °ष्मं) (for the prior half). M3. 5 अनीकिनीः. — (L. 137) After the prior half, Dn1 ins.:

पार्थिवैः परिवारितः (= post. half of line 140) ।
ससैन्यः पाण्डवानीकं (= prior half of line 141).

— Dn D4 transp. यदि and श्वेतो. — (L. 138) B4 पितामहस्. M3–5 तथा (for ततो). — (L. 139) M3. 4 विमुखा° (for विमना°). Dn D4 ह्यभूत् (for [अ]भवत्). M5 पुत्रास्ते विमुखाभवन्. — (L. 140) M3. 5 परिवारितं. — (L. 141) M3–5 अभिदुद्राव (for अभ्यद्रवत). — Dn D4 om. (hapl.) lines 142–145. — (L. 142) M3–5 विविंशतिः (for विशां पते). — (L. 145) M3–5 भज्यमानानि (for वध्य°). — (L. 146) M3–5 उद्दिश्य (for उत्सृज्य). — (L. 147) Da D5 वायुर्वृक्षम्; Dn D4 वृक्षान्वायुर् (by transp.). M3–5 वायुर्वर्धमिवागतं. — (L. 148) Dn D4 चैव; M3–5 तुभ्यं (for राजन्). — (L. 149) Dn2 D4 स (D4 सु-) महान् (for सहसा). Da D5 अपतत्सहसा भूमौ; M3–5 अभ्यधावत्पुनः संख्ये (M4 °ये). M3–5 महारथः (for व्यवस्थितः). — (L. 150) Dn D4 तत्रापि गतौ; M3–5 तत्र रूपितौ (for तत्रोपगतौ). Da D5 शरदंष्ट्रौ (for °दीप्तौ). M3–5 छत्रदंष्ट्रौ नखायुधौ (for the post. half). — After line 150, M3–5 ins.:

परस्परमयुध्येतां समेत्य पृथिवीपते ।
जातरूपगृहं चित्रं मृगपक्षिभिरावृतम् ।
देवदानवसंघैश्च पूजितं समहर्षिभिः ।

अन्योन्यं तु महाराज परस्परवधैषिणौ ।
निगृह्य कार्मुकं श्वेतो भीष्मं विव्याध सप्तभिः ।
पराक्रमं ततस्तस्य पराक्रम्य पराक्रमी ।
तरसा वारयामास मत्तो मत्तमिव द्विपम् । [155]
श्वेतः शांतनवं भूयः शरैः संनतपर्वभिः ।
विव्याध पञ्चविंशत्या तदद्भुतमिवाभवत् ।
तं प्रत्यविध्यद्दशभिर्भीष्मः शांतनवस्तदा ।
स विद्धस्तेन बलवान्नाकम्पत यथाचलः ।
वैराटिः समरे क्रुद्धो भृशमायम्य कार्मुकम् । [160]
आजघान ततो भीष्मं श्वेतः क्षत्रियनन्दनः ।
संप्रहस्य ततः श्वेतः सृक्किणी परिसंलिहन् ।
धनुश्चिच्छेद भीष्मस्य नवभिर्दशधा शरैः ।
संधाय विशिखं चैव शरं लोमप्रवाहिनम् ।
उन्ममाथ ततस्तालं ध्वजशीर्षं महात्मनः । [165]
केतुं निपतितं दृष्ट्वा भीष्मस्य तनयास्तव ।
हतं भीष्मममन्यन्त श्वेतस्य वशमागतम् ।
पाण्डवाश्चापि संहृष्टा दध्मुः शङ्खान्मुदा युताः ।
भीष्मस्य पतितं केतुं दृष्ट्वा तालं महात्मनः ।
ततो दुर्योधनः क्रोधात्स्वमनीकमचोदयत् । [170]
यत्नाद्भीष्मं परीप्सध्वं रक्षमाणाः समन्ततः ।
मा नः प्रपश्यमानानां श्वेतान्मृत्युमवाप्स्यति ।
भीष्मः शांतनवः शूरस्तथा सत्यं ब्रवीमि वः ।
राज्ञस्तु वचनं श्रुत्वा त्वरमाणा महारथाः ।
बलेन चतुरङ्गेण गाङ्गेयमन्वपालयन् । [175]
बाह्लीकः कृतवर्मा च शलः शल्यश्च भारत ।
जलसंधो विकर्णश्च चित्रसेनो विविंशतिः ।
त्वरमाणास्त्वराकाले परिवार्य समन्ततः ।
शस्त्रवृष्टिं सुतुमुलां श्वेतस्योपर्यपातयन् ।
तान्क्रुद्धो निशितैर्बाणैस्त्वरमाणो महारथः । [180]
अवारयदमेयात्मा दर्शयन्पाणिलाघवम् ।
स निवार्य तु तान्सर्वान्केसरी कुञ्जरानिव ।
महता शरवर्षेण भीष्मस्य धनुराच्छिनत् ।
ततोऽन्यद्धनुरादाय भीष्मः शांतनवो युधि ।
श्वेतं विव्याध राजेन्द्र कङ्कपत्रैः शितैः शरैः । [185]
ततः सेनापतिः क्रुद्धो भीष्मं बहुभिरायसैः ।
विव्याध समरे राजन्सर्वलोकस्य पश्यतः ।
ततः प्रव्यथितो राजा भीष्मं दृष्ट्वा निवारितम् ।
प्रवीरं सर्वलोकस्य श्वेतेन युधि वै तदा ।
निष्ठानकश्च सुमहांस्तव सैन्यस्य चाभवत् । [190]
तं वीरं वारितं दृष्ट्वा श्वेतेन शरविक्षतम् ।

— M3–5 om. lines 151–152. — (L. 151) Dn D4 यथा वा (for यथोभौ). B3 यथा च बलिवासवौ. — (L. 153) M3–5 विकृष्य (for निगृह्य). — (L. 154) M3–5 स पराक्रमसंपन्नः पराक्रम्य परं तदा. — (L. 155) Dn2 D4 पारयामास (for वारया°). M3–5 तरसाभिययौ भीष्मं (for the prior half). Da1 Dn1 D5 मत्तोत्तमम् (for मत्तो मत्तम्). — After line 155, the sequence of lines in Dn D4 is as follows: 160, 161, 158, 159, 156, 157, 162, 163. — (L. 156) M3–5 भीष्मं चित्रैः (for भूयः शरैः). — (L. 157) M3–5 अविध्यत् (for विव्याध). — (L. 158) Dn D4 M3.5 तथा (for तदा). — (L. 159) M3–5 हेमपुंखैर्महेष्वासः कृतहस्तो महाबलः. — (L. 160) M3–5 वैराटिः समरे राजञ्शरैः संनतपर्वभिः. — (L. 161) M3–5 क्षत्रियमर्दनः. — (L. 162) Dn D4 M3–5 प्रहस्य च रणे श्वेतः (M3–5 भीष्मं) (for the prior half). M3–5 सृक्किणी संलिहन्निव. — Dn1 D4 om. lines 163–169. — (L. 163) M3–5 दशभिर् (for नवभिर्). — (L. 164) M3–5 संधाय च पुनश्चित्रं भल्लं वै रोमशातनं. — (L. 165) M3–5 पुनस् (for ततस्), and महाबलः (for °त्मनः). — B3.4 Da D5 om. (hapl.) lines 166–169. — (L. 170) M3–5 क्रुद्धः (for क्रोधात्). Dn1 अनोदयत् (for अचोद°). — (L. 171) B4 यत्ता ; M3–5 यत्तो (for यत्नाद्). — (L. 172) B4 Da D5 मा तातः पश्यमानानां ; Dn D4 तानूचे पश्यमानास्तान् ; M3–5 मा(M4 मो)हितः प्रेक्षमाणानां (for the prior half). B4 अवाप्स्यसि ; M3–5 अवाप्नुयात् (for अवाप्स्यति). Dn1 श्वेतोस्तमथ वाप्स्यति ; Dn2 श्वेतोस्तं समवा° ; D4 श्वेतोस्तं मप्यवा°. — (L. 173) Dn D4 ते (for वः). M3–5 तत्र गच्छत मचिरं (for the post. half). — (L. 175) Dn D4 अनुपालयन् (for अन्व°). M3–5 चतुरंगेण सैन्येन सर्वे भीष्ममपालयन्. — After line 177, M3–5 ins. :

राज्ञः प्रियहितार्थं वै संक्रुद्धाः शस्त्रपाणयः ।

— M3–5 om. line 178. — (L. 179) Dn D4 सुवहुलां ; M3.4 सुविपुलां (for सुतुमुलां). B3 श्वेतस्योपरि पातयन् ; M3–5 °स्योरस्यपात(M5 °त)यत्. — (L. 180) Dn तान्क्रुद्धान् ; M5 क्रुद्धोमून् (for तान्क्रुद्धो). B3 Dn D4 महाबलः (for °रथः). — (L. 181) M3–5 शक्तिमात्मनः (for पाणिलाघवम्). — (L. 182) Dn D4 M3–5 सं- (for स). M3–5 ततः (for तु तान्). — (L. 183) M3–5 भीष्ममेव समर्पय (for the posterior half). — (L. 185) B3.4 Dn D4 M3–5 शिलाशितैः ; Da1 शतैः शरैः. — (L. 188) M3–5 transp. भीष्मं and दृष्ट्वा. — (L. 189) B3 वै सदा ; M4.5 मारिष (for वै तदा). — (L. 190) Dn निस्वानकश्च ; M4.5 निष्ठानकं च. M3–5 तव सैन्ये व्यजायत (for the post. half). —

हतं श्वेतेन मन्यन्ते श्वेतस्य वशमागतम् ।
ततः क्रोधवशं प्राप्तः पिता देवव्रतस्तव ।
ध्वजमुन्मथितं दृष्ट्वा तां च सेनां निवारिताम् ।
श्वेतं प्रति महाराज व्यसृजत्सायकान्बहून् । [195]
तानावार्य रणे श्वेतो भीष्मस्य रथिनां वरः ।
धनुश्चिच्छेद भल्लेन पुनरेव पितुस्तव ।
उत्सृज्य कार्मुकं राजन्गाङ्गेयः क्रोधमूर्छितः ।
अन्यत्कार्मुकमादाय विपुलं बलवत्तरम् ।
तत्र संधाय विपुलान्भल्लान्सप्त शिलाशितान् । [200]
चतुर्भिश्च जघानाश्वाञ्श्वेतस्य पृतनापतेः ।
ध्वजं द्वाभ्यां तु चिच्छेद सप्तमेन च सारथेः ।
शिरश्चिच्छेद भल्लेन संक्रुद्धो लघुविक्रमः ।
हताश्वसूतात्स रथादवप्लुत्य महाबलः ।
अमर्षवशमापन्नो व्याकुलः समपद्यत । [205]
विरथं रथिनां श्रेष्ठं श्वेतं दृष्ट्वा पितामहः ।
ताडयामास निशितैः शरसंघैः समन्ततः ।
स ताड्यमानः समरे भीष्मचापच्युतैः शरैः ।
स्वरथे धनुरुत्सृज्य शक्तिं जग्राह काञ्चनीम् ।
ततः शक्तिं रणे श्वेतो जग्राहोग्रां महाभयाम् । [210]
कालदण्डोपमां घोरां मृत्योरिव स्वसां श्वसन् ।
अब्रवीच्च तदा श्वेतो भीष्मं शांतनवं रणे ।
तिष्ठेदानीं सुसंरब्धः पश्य मां पुरुषो भव ।
एवमुक्त्वा महेष्वासो भीष्मं युधि पराक्रमी ।
ततः शक्तिममेयात्मा चिक्षेप भुजगोपमाम् । [215]
पाण्डवार्थे पराक्रान्तस्तवानर्थं चिकीर्षति ।
हाहाकारो महानासीत्पुत्राणां ते विशां पते ।
दृष्ट्वा शक्तिं महाघोरां मृत्योर्दण्डसमप्रभाम् ।
श्वेतस्य करनिर्मुक्तां निर्मुक्तोरगसंनिभाम् ।
अपतत्सहसा राजन्महोल्केव नभस्तलात् । [220]
ज्वलन्तीमन्तरिक्षे तां ज्वालाभिरिव संवृताम् ।
असंभ्रान्तस्तदा राजन्पिता देवव्रतस्तव ।
अष्टभिर्नवभिर्भीष्मः शक्तिं चिच्छेद पत्रिभिः ।
उत्कृष्टहेमविकृतां निकृत्तां निशितैः शरैः ।
उच्चुक्रुशुस्ततः सर्वे तावका भरतर्षभ । [225]
शक्तिं विनिहतां दृष्ट्वा वैराटिः क्रोधमूर्छितः ।
कालोपहतचेतास्तु कर्तव्यं नाभ्यजानत ।

(L. 191) Dn D_4 त्वरितं (for तं वीरं). D_4 तां च सेनां निवारितां (for the post. half). — (L. 192) Da D_5 स्वल्पं ते; Dn D_4 मन्यंत. B_4 M_{3-5} हतं त्वेन- (B_4 भीष्म-; M_4 चैन)ममन्यंत (for the prior half). D_5 श्वेतेन (for श्वेतस्य). — (L. 193) M_5 प्राप्य (for प्राप्तः). — Da D_5 om. (hapl.) lines 194–197. — B_3 transp. lines 195–196 and lines 205–208. — (L. 195) $M_{3,4}$ महाबाहुर् (for °राज). — (L. 196) M_{3-5} तान्निवार्य शरैः श्वेतो. — (L. 198) M_{3-5} तंदुत्सृज्य धनू राजन्. — (L. 199) M_{3-5} भारघ्नं वेगवत्तरं (for the post. half). — (L. 200) M_{3-5} संदधे विपुलान्सप्त भल्लांश्चापि शिलाशितान्. — (L. 201) Dn D_4 चतुर्भिश्चतुरश्चाश्वान्; M_{3-5} तैश्चतुर्भिर्जघाना°. — (L. 202) Dn D_4 च (for तु). $M_{3,5}$ तु (for च). — (L. 203) M_{3-5} transp. भल्लेन and संक्रुद्धो. — (L. 204) $B_{3,4}$ Dn D_4 महारथः; Da_1 महाकलः (for महाबलः). — B_3 transp. lines 205–208 and lines 195–196. — B_4 om. lines 205–208. — After line 205, M_{3-5} ins.:

समब्रवीत्ततो भीष्मः श्वेतं च भरतर्षभ ।
अन्यं न जानाति भवान्धनुर्न्यस्य प्रबुध्य मा ।

— (L. 206) Da_2 श्रेष्ठः. M_{3-5} om. श्वेतं and read कृत्वा (for दृष्ट्वा). — (L. 207) M_{3-5} पूरयामास रभसं (for the prior half). — (L. 208) M_{3-5} हन्यमानः (for ताड्य°). — (L. 210) M_{3-5} transp. शक्तिं and श्वेतो. Dn D_4 घोरां (for श्वेतो). Dn_1 D_4 ग्रहायोग्रां; M_{3-5} गृहीत्वोग्रां (for जग्राहोग्रां). — (L. 211) Da_1 मृत्युर् (for मृत्योर्). B_3 सुसं- (for स्वसां). Dn D_4 मृत्योश्च शमनक्षमां; M_{3-5} स्वसां (M_3 °सा) मृत्योरिवौकसां. — (L. 213) M_{3-5} रणे यत्तः पश्यामि (for सुसंरब्धः पश्य मां). Dn_1 (before corr. as above), n_3 पुरुषोत्तम (for °षो भव). — (L. 214) M_{3-5} महाबाहुर् (for महेष्वासो), and दुरासदं (for पराक्रमी). — (L. 215) Da_2 D_5 भुजगोपमं. — (L. 216) B_4 तवानर्थश्चिकीर्षितः; Da D_5 तवार्थे किं चिकीर्षवः; M_{3-5} तवानर्थे चिकीर्षितां. — (L. 218) M_{3-5} मृत्युदंडनिभां तदा. — After line 218, M_{3-5} ins.:

श्वेतस्य करमध्यस्थां स्कन्दस्येवायसीं गदाम् ।

— (L. 219) M_{3-5} सा श्वेतभुज(M_3 °कर)निर्मुक्ता निर्मुक्तोरगसंनिभा. — (L. 220) M_5 आपतत्. M_{3-5} भीष्मं (for राजन्), and °स्तलं (for °स्तलात्). — (L. 221) Da_2 अंतरीक्षे. M_{3-5} तेजसा (for संवृताम्). — (L. 222) Dn_2 सुसंभ्रांतस्. M_{3-5} पिता शांतनवस्तदा (M_5 °व). — (L. 223) M_{3-5} अष्टाभिर् (for अष्ट°). Da Dn $D_{4,5}$ नवधा; M_{3-5} अष्टधा (for नवभिर्). M_4 चिक्षेप (for चिच्छेद). — (L. 224) Da_1 Dn_3 °विकृता; M_{3-5} उत्तप्तहेमनिकृता (for the prior half). Dn_2 D_4 M_{3-5} निकृतां. — After line 224, M_{3-5} ins.:

अशेत पतिता भूमौ महोल्केव दिवश्च्युता ।

क्रोधसंमूर्छितो राजन्वैराटिः प्रहसन्निव ।
गदां जग्राह संहृष्टो भीष्मस्य निधनं प्रति ।
क्रोधेन रक्तनयनो दण्डपाणिरिवान्तकः । [230]
भीष्मं समभिदुद्राव जलौघ इव पर्वतम् ।
तस्य वेगमसंवार्यं मत्वा भीष्मः प्रतापवान् ।
प्रहारविप्रमोक्षार्थं सहसा धरणीं गतः ।
श्वेतः क्रोधसमाविष्टो भ्रामयित्वा तु तां गदाम् ।
रथे भीष्मस्य चिक्षेप यथा देवो धनेश्वरः । [235]
तया भीष्मनिपातिन्या स रथो भस्मसात्कृतः ।
सध्वजः सह सूतेन साश्वः सयुगबन्धुरः ।
विरथं रथिनां श्रेष्ठं भीष्मं दृष्ट्वा रथोत्तमाः ।
अभ्यधावन्त सहिताः शल्यप्रभृतयो रथाः ।
ततोऽन्यं रथमास्थाय धनुर्विस्फार्य दुर्मनाः । [240]
शनकैरभ्ययाच्छ्वेतं गाङ्गेयः प्रहसन्निव ।
एतस्मिन्नन्तरे भीष्मः शुश्राव विपुलां गिरम् ।
आकाशादीरितां दिव्यामात्मनो हितसंभवाम् ।
भीष्म भीष्म महाबाहो शीघ्रं यत्नं कुरुष्व वै ।
एष ह्यस्य जये कालो निर्दिष्टो विश्वयोनिना । [245]
एतच्छ्रुत्वा तु वचनं देवदूतेन भाषितम् ।
संप्रहृष्टमना भूत्वा वधे तस्य मनो दधे ।
विरथं रथिनां श्रेष्ठं श्वेतं दृष्ट्वा पदातिनम् ।
सहितास्त्वभ्यवर्तन्त परीप्सन्तो महारथाः ।
सात्यकिर्भीमसेनश्च धृष्टद्युम्नश्च पार्षतः । [250]
कैकेयो धृष्टकेतुश्च अभिमन्युश्च वीर्यवान् ।
एतानापततः सर्वान्द्रोणशल्यकृपैः सह ।
अवारयदमेयात्मा वारिवेगानिवाचलः ।
स निरुद्धेषु सर्वेषु पाण्डवेषु महात्मसु ।
श्वेतः खड्गमथाकृष्य भीष्मस्य धनुराच्छिनत् । [255]
तदपास्य धनुश्छिन्नं त्वरमाणः पितामहः ।
देवदूतवचः श्रुत्वा वधे तस्य मनो दधे ।
ततः प्रचारमाणस्तु पिता देवव्रतस्तव ।
अन्यत्कार्मुकमादाय त्वरमाणो महारथः ।
क्षणेन सज्यमकरोच्छक्रचापसमप्रभम् । [260]
पिता ते भरतश्रेष्ठ श्वेतं दृष्ट्वा महारथैः ।
वृतं तं मनुजव्याघ्रैर्भीमसेनपुरोगमैः ।
अभ्यवर्तत गाङ्गेयः श्वेतं सेनापतिं द्रुतम् ।
आपतन्तं ततो भीष्मो भीमसेनं प्रतापवान् ।
आजघ्ने विशिखैः षष्ट्या सेनान्यं स महारथः । [265]
अभिमन्युं च समरे पिता देवव्रतस्तव ।
आजघ्ने भरतश्रेष्ठस्त्रिभिः संनतपर्वभिः ।
सात्यकिं च शतेनाजौ भरतानां पितामहः ।
धृष्टद्युम्नं च विंशत्या कैकेयं चापि पञ्चभिः ।

— (L. 225) Dn1 उच्च° (for उच्चु°). M3–5 तदा (for ततः). — (L. 226) Da1 M5 विनिहितां. — (L. 227) Dn D4 च (for तु). M3–5 कालस्य परिणामाच्च कर्तव्यं न प्रचेतयन्. — (L. 230) M3–5 क्रोधसंरक्तनयनो. Dn D4 इवापरः (for इवान्तकः). — (L. 232) Da2 D5 °संवार्यं ; M3–5 °संहार्यं. — (L. 233) Dn D4 प्रभाव-विप्रमोक्षार्थं ; M3–5 तत्प्रहारविनोक्षार्थं. — (L. 234) Dn D4 क्रोधवशाविष्टो. — (L. 235) M3–5 मघवानशनीमिव (for the post. half). — (L. 236) D4 भीम° (for भीष्म°). M3–5 गदया वीरघातिन्या (for the prior half). — (L. 237) Dn D4 साश्वः सहयुगंधरः ; M3–5 साश्वः सरथकूबरः (for the post. half). — (L. 238) Da D5 दृश्य (for दृष्ट्वा). M3–5 रथोत्तमं. — (L. 239) M3–5 अभ्यवर्तत संहृष्टाः. — (L. 240) M3. 4 विष्फार्य. — (L. 241) M3–5 गांगेयो व्यथयन्निव. — (L. 242) M3–5 मधुरां (for विपुलां). — (L. 243) Dn आकाशोदीरितां दिव्याम्. B3 हितसंभ्रमां ; M3–5 हर्षवर्धनीं (for हितसंभवाम्). — (L. 244) M3–5 ह (for वै). — (L. 245) M3. 4 वधे (for जये). M3–5 निर्दिष्टो भावितात्मनः. — (L. 246) M3–5 देवदूतस्य भारत (for the post. half). — (L. 248) Da D5 दृश्य (for दृष्ट्वा). M3–5 रथोत्तमं (for पदातिनम्). — (L. 249) Dn1 D4 न्यवर्तत (for [अ]न्यवर्तन्त). — (L. 250) M3–5 भीमसेनः सात्यकिश्च. — (L. 251) Da1 Dn2 M3 कैकेया ; M4 कैकया. — (L. 252) M4 °पततान्. Dn D4 दृष्ट्वा (for सर्वान्). M3–5 द्रोणः शल्यकृपान्वितः. — (L. 253) M3. 5 अवारयन्. Dn1 D4 वायु° (for वारि°). — (L. 254) M3–5 सं- (for स). — (L. 255) B4 उपाकृष्य ; M3. 4 अपाविध्य (for अथाकृष्य). M3–5 धनुरच्छिनत्. B4 भीष्मस्तस्याच्छिनत्ततः. — (L. 258) M3–5 ततः प्रत्वरमाणास्तु. — (L. 259) M3–5 दृढज्यं स महाबलः (for the post. half). — (L. 261) Dn भरतश्रेष्ठः. B3 महारथः ; Dn D4 M3–5 °रथं. — (L. 262) M3–5 तैर् (for तं). Dn D4 तैर्नरव्याघ्रैर् (for मनुज°). — (L. 263) Dn D4 कृतं (for द्रुतम्). — (L. 264) Dn D4 M3–5 भीष्मं भीमसेनः (for भीष्मो भीमसेनं). — D5 reads line 265, after line 267. — (L. 265) Da Dn D4. 5 च (for स). M3–5 श्वेतार्थं तं महा(M4 °नो)रथं (for the post. half). — (L. 266) M3–5 अभिमन्युश्च. M3–5 पितरं तं यतव्रतं (M3 यशस्विनं) (for the post. half). — After line 266, Dn D4 ins. :

वारयित्वा शरैर्घोरैरन्यानपि महारथान् ।

— (L. 267) Da2 Dn1 D5 M5 भरतश्रेष्ठ. — (L.

तांश्च सर्वान्महेष्वासान्पिता देवव्रतस्तव । [270]
वारयित्वा शरैर्घोरैः श्वेतमेवाभिदुद्रुवे ।
ततः शरं मृत्युसमं भारसाधनमुत्तमम् ।
विकृष्य बलवान्भीष्मः समाधत्त दुरासदम् ।
ब्रह्मास्त्रेण सुसंयुक्तं तं शरं लोमवाहिनम् ।
ददृशुर्देवगन्धर्वाः पिशाचोरगराक्षसाः । [275]
स तस्य कवचं भित्त्वा हृदयं चामितौजसः ।
जगाम धरणीं बाणो महाशनिरिव ज्वलन् ।
अस्तं गच्छन्यथादित्यः प्रभामादाय सत्वरः ।
एवं जीवितमादाय श्वेतदेहाज्जगाम ह ।
तं भीष्मेण नरव्याघ्रं तथा विनिहतं युधि । [280]
प्रपतन्तमपश्याम गिरेः शृङ्गमिव च्युतम् ।
अशोचन्पाण्डवास्तत्र क्षत्रियाश्च महारथाः ।
प्रहृष्टाश्च सुतास्तुभ्यं कुरवश्चापि सर्वशः ।
ततो दुःशासनो राजञ्श्वेतं दृष्ट्वा निपातितम् ।
वादित्रनिनदैर्घोरैर्नृत्यति स्म समन्ततः । [285]
तस्मिन्हते महेष्वासे भीष्मेणाहवशोभिना ।
प्रावेपन्त महेष्वासाः शिखण्डिप्रमुखा रथाः ।
ततो धनंजयो राजन्वार्ष्णेयश्चापि सर्वशः ।
अवहारं शनैश्चक्रुर्निहते वाहिनीपतौ ।
ततोऽवहारः सैन्यानां तव तेषां च भारत । [290]
तावकानां परेषां च नर्दतां च मुहुर्मुहुः ।
पार्था विमनसो भूत्वा न्यविशन्त महारथाः ।
चिन्तयन्तो वधं घोरं द्वैरथेन परंतपाः ।

Colophon.

धृतराष्ट्र उवाच ।

श्वेते सेनापतौ तात संग्रामे निहते परैः ।
किमकुर्वन्महेष्वासाः पाञ्चालाः पाण्डवैः सह । [295]
सेनापतिं समाकर्ण्य श्वेतं युधि निपातितम् ।
तदर्थं यततां चापि परेषां प्रपलायिनाम् ।
मनः प्रीणाति मे वाक्यं जयं संजय शृण्वतः ।
प्रत्युपायं चिन्तयन्तः सज्जनाः प्रस्रवन्ति मे ।
स हि वीरोऽनुरक्तश्च वृद्धः कुरुपतिस्तदा । [300]
कृतं वैरं सदा तेन पितुः पुत्रेण धीमता ।
तस्योद्वेगभयाच्चापि संश्रितः पाण्डवान्पुरा ।
सर्वं बलं परित्यज्य दुर्गं संश्रित्य तिष्ठति ।
पाण्डवानां प्रतापेन दुर्गं देशं निवेश्य च ।
सपत्नान्सततं बाधन्नार्यवृत्तिमनुष्ठितः । [305]
आश्चर्यं वै सदा तेषां पुरा राज्ञां सुदुर्मतिः ।
ततो युधिष्ठिरे भक्तः कथं संजय सूदितः ।
प्रक्षिप्तः संमतः क्षुद्रः पुत्रो मे पुरुषाधमः ।
न युद्धं रोचयेद्भीष्मो न चाचार्यः कथंचन ।

---

268) M$_{3-5}$ सात्यकिश्च शतेनैव (M$_3$ °नाजौ) भरतानाममर्षणः (M$_4$ °पं). — (L. 269) M$_{3-5}$ धृष्टद्युम्नश्च विंशत्या कैके- (M$_5$ केक)याः पंच पंचभिः. — (L. 270) M$_{3-5}$ तु (for च). — (L. 271) M$_{3-5}$ तूर्णं (for घोरैः). M$_{3,5}$ °दुद्रुवुः. — (273) Da D$_5$ विक्षिप्य (for °कृष्य). M$_{3-5}$ चासृजद् (for बलवान्). Dn D$_4$ समधत्त ; M$_{3-5}$ तरसा तं. — (L. 274) M$_{3-5}$ ब्राह्मेणास्त्रेण संयुक्तं शरं वै लोमवाथिनं. — (L. 275) B$_3$ ऋषयोथ समानुपाः ; B$_4$ पिशाचोरगदानवाः. — (L. 276) M$_{3-5}$ transp. कवचं and हृदयं. Dn D$_4$ ज्वलदग्न्यामितौजसः. — (L. 278) M$_{3-5}$ प्राप्य (for गच्छन्), and गच्छति (for सत्वरः). — (L. 279) M$_{3-5}$ श्वेतस्येपुर् (for °देहाज्). Dn D$_4$ सः (for ह). — (L. 280) D$_5$ भीष्मेण च ; M$_{3-5}$ भीष्मेण तं (by transp.). D$_4$ नरव्याघ्र. M$_{3-5}$ तथा निहतचेतसं (for the post. half). — (L. 281) M$_{4,5}$ गिरिशृंग°. — (L. 282) Dn$_2$ अनोधाः ; D$_4$ अघोषाः ; M$_5$ अशोचः. M$_{3-5}$ transp. पांडवाः and क्षत्रियाः, and read सर्वे (for तत्र). Dn D$_4$ ये (for च). — (L. 283) M$_{3-5}$ हर्षयंतः (for प्रहृष्टाश्च). Dn D$_4$ तु (for च), and सर्वे (for तुभ्यं). M$_{3-5}$ कौरवाश् (for कुरवश्). — (L. 285) M$_{3-5}$ पुनः पुनः (for समन्ततः). — (L. 286) Dn अस्मिन् (for तस्मिन्). M$_{3-5}$ भीष्मेणामित्रकर्शिना. — (L. 287) Da D$_5$ प्रापतंत (for प्रावेपन्त). M$_{3-5}$ नृपाः (for रथाः). — M$_{3-5}$ om. lines 288–339. — (L. 290) Dn D$_4$ उभयेषां (for तव तेषां). — (L. 291) Dn D$_4$ नर्दतां मर्प(Dn$_1$ °र्द)तां स्वनः (for the post. half). — (L. 292) B$_4$ न्यवर्तंत ; Da D$_5$ न्यवसंत. — (L. 293) Dn D$_4$ कौरवाणां (for द्वैरथेन). — Colophon. — *Adhy. no.* : Da$_2$ 6, Dn$_2$ 46, D$_5$ 48.

(L. 294) B$_3$ शरैः (for परैः). — (L. 295) Dn$_2$ D$_4$ पंचालाः. — (L. 298) Da D$_5$ प्रीणासि (for प्रीणाति). — (L. 299) B$_{3,4}$ Dn$_1$ (before corr. as above). n$_2$ D$_4$ Cal. ed. प्रत्यवायं. Da D$_5$ Cal. ed. चिंतयतः ; Dn$_1$ (before corr.) °यंतं ; Dn$_2$ D$_4$ °यतां. Dn$_1$ (before corr. as above) प्रस्तुवंति. B$_3$ मतशान्प्रसवंति मे ; Dn$_2$ D$_4$ लज्जां नः प्राप्नु(D$_4$ प्रस्तु)वंति मे ; Cal. ed. लज्जां प्राप्नोति मे न हि. — (L. 300) Dn$_2$ कुलपति°. — (L. 301) B$_{3,4}$ कृतवैरः. — (L. 302) Dn D$_4$ तस्योद्वेगाद् (for °द्वेग-). Da$_1$ संचितः ; Da$_2$ D$_5$ संश्रिता. Da$_1$ पांडवाः. — (L. 303) Dn D$_4$ सर्वस्वं परिसंत्यज्य (for the prior half), and दुःखं (for दुर्गं). — (L. 304) Da D$_5$ दुर्गं देश्यं ; Dn D$_4$ दुर्गदेशं. Dn D$_4$ प्रविश्य (for निवेश्य). — (L. 305) Dn D$_4$ सपत्नशतसंबाधे सत्वेवं (Dn$_1$ स नैव ;

न कृपो न च गान्धारी नाहं संजय रोचये । [310]
न वासुदेवो वार्ष्णेयो धर्मराजश्च पाण्डवः ।
न भीमो नार्जुनश्चैव न यमौ पुरुषर्षभौ ।
वार्यमाणो मया नित्यं गान्धार्या विदुरेण च ।
जामदग्न्येन रामेण व्यासेन च महात्मना ।
दुर्योधनो युध्यमानो नित्यमेव हि संजय । [315]
कर्णस्य मतमास्थाय सौबलस्य च पापकृत् ।
दुःशासनस्य च तथा पाण्डवानन्वसूयत ।
तस्याहं व्यसनं घोरं मन्ये प्राप्तं तु संजय ।
श्वेतस्य च विनाशेन भीष्मस्य विजयेन च ।
संक्रुद्धः कृष्णसहितः पार्थः किमकरोद्युधि । [320]
अर्जुनाद्धि भयं भूयस्तन्मे तात न शाम्यति ।
स हि शूरश्च कौन्तेयः क्षिप्रकारी च पाण्डवः ।
मन्ये शरैः शरीराणि प्रमथिष्यति विद्विषाम् ।
ऐन्द्रिरिन्द्रानुजसमो महेन्द्रसदृशो बले ।
अमोघक्रोधसंकल्पं दृष्ट्वा वः किमभून्मनः । [325]
तथैव वेदविच्छूरो ज्वलनार्कसमद्युतिः ।
ऐन्द्रास्त्रविदमेयात्मा प्रपतन्समितिंजयः ।
वज्रसंस्पर्शरूपाणामस्त्राणां न्यासकारिता ।
स खड्गाक्षेपहस्तस्तु घोषं चक्रे महारथः ।
स संजय महाप्राज्ञो द्रुपदस्यात्मजो बली । [330]
धृष्टद्युम्नः किमकरोच्छ्वेते युधि निपातिते ।
पुरा चैवापराधेन वधेन च चमूपतेः ।
मन्ये मनः प्रजज्वाल पाण्डवानां महात्मनाम् ।
तेषां क्रोधं चिन्तयंस्तु अहःसु च निशासु च ।
न शान्तिमधिगच्छामि सर्वमाचक्ष्व संजय । [335]

संजय उवाच ।

गतपूर्वाह्णभूयिष्ठे तस्मिन्नहनि दारुणे ।
तावकानां परेषां च पुनर्युद्धमवर्तत ।
श्वेतं तु निहतं दृष्ट्वा विराटस्य चमूपतिम् ।
कृतवर्मणा च सहितं दृष्ट्वा शल्यमवस्थितम् ।

5

After 6. 46. 55, D_1 ins. (= repetition, with v. l., of 6. 19. 43^{ab} to 6. 20. 10^{ab}):

शब्दश्च सुमहांस्तत्र दिवस्पृग्भरतोत्तम ।
एवं ते पुरुषव्याघ्राः पाण्डवा युद्धदुर्मदाः ।
व्यवस्थिताः प्रतिव्यूह्य तव पुत्रस्य वाहिनीम् ।
त्रसन्तीव हि चेतांसि योधानां भरतर्षभ ।
दृष्ट्वाग्रतो भीमसेनं गदापाणिमवस्थितम् । [5]

धृतराष्ट्र उवाच ।

सूर्योदये संजय के तु पूर्वं
युयुत्सवो हृष्टरूपास्तथासन् ।
किं मामका भीष्मनेत्राः समीयुः
किं पाण्डवा भीमनेत्रास्तदानीम् ।
केषां जघन्यौ सोमसूर्यौ सुवायुः [10]
केषां सेनां श्वापदा व्याहरेयुः ।
केषां यूनां मुखवर्णाः प्रसन्नाः
सर्वं ह्येतद्ब्रूहि तत्त्वं यथावत् ।

संजय उवाच ।

उभे सेने तुल्यमेवोपपन्ने
उभे सेने हर्षरूपे तथैव । [15]
उभे चित्रे वनराजीप्रकाशे
उभे सेने नागरथाश्वपूर्णे ।
उभे सेने भीमरूपे नरेन्द्र
तथा चोभे भारत दुर्विषह्ये ।
तथा चोभे स्वर्गजयाय तुष्टे [20]

D_4 त्वय्येव) समवास्थितः. — (L. 308) B_4 प्रक्लिष्टः (for प्रक्षिप्तः). B_3 स गतः; Dn D_4 संयतः (for संमतः). B_4 Dn_2 क्रुद्धः (for क्षुद्रः). B_4 Dn D_4 पाताले (for पुत्रो मे). B_3 पुरुषोधमः. — (L. 309) B_4 लब्धुत्वं (for न युद्धं). — (L. 310) Dn_1 (by corr.) D_4 गांधारो. Dn_1 रोचसे. — (L. 313) Da_1 वीर्यमाणो न या नित्यं (sic). — (L. 315) Dn D_4 युद्धनना (for युध्यमानो). — (L. 317) Da D_5 °चिंतयत् (for °सूयत). — (L. 319) Dn_2 रणे (for °न च). — (L. 322) Dn D_4 महाबलः (for च पाण्डवः). — (L. 323) B_4 शात्यवान्; B_3 Da D_5 M_{3-5} शात्रवान् (for विद्विषान्). — (L. 324) $B_{3.4}$ इंद्रानुजसमं; Dn D_4 इंद्रात्मजस्तनः. $B_{3.4}$ Dn D_4 उपेंद्रसदृशो रणे ($B_{3.4}$ °शं बले). — (L. 325) Da Dn D_4 अमोघ(Da असौ चु)क्रोधसंकल्पो. Da D_5 तनः (for मनः). — (L. 327) Da D_5 इंद्रास्त्र°. Dn प्राप तत् (for प्रपतन्). D_4 प्रायात्समितिनिसंजय. — (L. 328) $B_{3.4}$ Da_2 D_5 स वज्रस्पर्शरूपाणाम्. Dn D_4 न्यायकारिता. — (L. 329) B_3 Dn D_4 शुभ्रज्याक्षेपहस्तं तु (B_3 °स्तस्तु). B_3 घोरं; Dn D_4 शरं (for घोषं). — (L. 332) Dn D_4 मम (for पुरा), and सर्वमेतन्न शिष्यति (for the post. half). — (L. 334) Da D_5 चिंतयतां. — (L. 336) Dn_1 D_4 गतपूर्वाह्णसमये. $B_{3.4}$ Da Dn D_5 om. lines 337–339.

तथा चोभे सत्पुरुषोपजुष्टे ।
पश्चान्मुखाः कौरवा धार्तराष्ट्रा-
स्तथा पाण्डवाः प्राङ्मुखा योत्स्यमानाः ।
दैत्येन्द्रसेनेव च कौरवाणां
सुरेन्द्रसेनेव च पाण्डवानाम् । [25]
ववौ वायुः पृष्ठतः पाण्डवानां
तथा वायुः सन्मुखस्तावकानाम् ।
गजेन्द्राणां मदगन्धा * * *
न सेहिरे तव पुत्रस्य नागाः ।
दुर्योधनो दन्तिवरं पद्मवर्णं [30]
सुवर्णकक्षं जातबलं प्रभिन्नम् ।
समास्थितो मध्यगतः कुरूणां
संस्तूयमानो रथिभिर्मागधैश्च ।
चन्द्रप्रभं श्वेतमस्यातपत्रं
तथा सौवर्णा स्रग्भ्राजते चोत्तमाङ्गे । [35]
तं सर्वतः शकुनिः पार्वतीयः
सार्धं गान्धारैः पाति गान्धारराजः ।
भीष्मोऽग्रतः सर्वसैन्यस्य वृद्धः
श्वेतच्छत्रः श्वेतकचः सशङ्खः ।
श्वेतोष्णीषः पाण्डुरेण ध्वजेन [40]
श्वेतो रथः शैलसमप्रकाशः ।
तद्वत्सैन्यं धार्तराष्ट्रस्य सर्वे
बाह्लिकानां चातिरथो महात्मा ।
महेष्वासा महाभागाः स्थिता युद्धाय दंशिताः ॥

APPENDIX II

This Appendix is primarily a list of Sanskrit citations from the Bhīṣmaparvan embedded in the abridged paraphrase of that parvan in the Old-Javanese as edited by Dr. J. Gonda in the Bibliotheca Javanica, No. 7 (1936). The page and line reference in column 1 of the Appendix refers to the above edition. The Sanskrit citations are introduced by the Old-Javanese author at variable intervals, and are also immediately translated, fairly closely, into the Old-Javanese. But, in between these citations, and as their connecting links, are found bits of prose narrations in Old-Javanese, which can be used as evidence, if not for the form, at least for the substance of the epic story as current in Java towards the end of the first millennium of the Christian era. For the Bhagavadgītā portion of the Bhīṣmaparvan (our chapters 23–40), Dr. J. Gonda has published (1935) a complete translation into English of the Old-Javanese paraphrase of the Bhagavadgītā including its renderings of the Sanskrit citations. This has enabled us to ascertain not only what parts of the Bhagavadgītā are actually quoted, but also what additional parts are presupposed and what parts entirely omitted in the Javanese version of the poem (vide the Tabular Statement on pp. 728–729). For the rest of the Bhīṣmaparvan a somewhat similar help is available in the same Dutch scholar's *Aanteekeningen bij het Oud-Javaansche Bhīṣmaparwa* (Bibliotheca Javanica 7*a*, 1937), the first chapter of which furnishes a critical comparison of the Old-Javanese text with the texts given by the Calcutta, Bombay and Madras editions of the parvan (our chapters 41 to end), while its concluding chapter gives the results of a similar comparison for the cosmographical episode in the Old-Javanese Bhīṣmaparvan (our chapters 5–13), as a result of which Dr. Gonda endorses the findings of Dr. Luise Hilgenberg in her Doctorate thesis entitled *Die Kosmographische Episode im Mahābhārata und Padmapurāṇa* (Stuttgart, 1934), against which I have expressed my dissent in a paper contributed to *A Volume of Eastern and Indian Studies presented to Professor F. W. Thomas* (1939), pp. 19 ff.

In the present Appendix the Sanskrit citations culled from the Old-Javanese Bhīṣmaparvan are compared with the corresponding portions in the three current editions of the Epic, viz. the Calcutta edition of 1834–1839 (*Editio Princeps*), the Bombay edition as brought out by Ganapat Krishnaji in 1863 (*the Vulgate*), and the Madras edition of P. P. S. Sastri (1931–1936: Bhīṣmaparvan 1934), as well as with the Critical Edition. In the case of the text of the Bhagavadgītā portion, however, its Kashmir Recension (as represented by the edition of Pandit Lakshman Raina, Shrinagar (1933), has been set forth in an additional column of comparison, the general results of which will be found dealt with in the Introduction. Complete identity between the passages compared is shown by the sign of equality (=); general agreement with minor modifications is shown by the sign plus-or-minus (±); while greater divergences are indicated by the tilde (∼) which is used to denote difference amounting virtually to a free paraphrase. The Sanskrit citations are reproduced with their orthographical peculiarities (as regards ब-व, र-ल, and the sibilants), while important variant readings given by Dr. Gonda are inserted as footnotes.

The results of these comparisons are somewhat important for determining not only the particular recension of the Bhīṣmaparvan (and the Bhagavadgītā) which was familiar to the Old-Javanese author, but also, possibly, for determining the particular stage in the evolution of the Mahābhārata itself there presupposed. Remarks on this topic, which turns upon the introduction of a passage from the Śāntiparvan at the end of the Javanese version of the Bhīṣmaparvan, will be found in the Introduction.

OLD-JAVANESE BHAGAVADGĪTĀ : TABULAR STATEMENT

Parts Cited	Parts Paraphrased	Parts Omitted	Parts Added
	Adhy.	1	
28^{cd}–29^{ab}, 31^{cd}–32^{ab}, 46	12, 14, 15^{cd}–21, 28^{ab}, 29^{cd}–30, 32^{cd}, 36^{abc}, 42^{cd}, 45^{ab}, 47^{c}	1–11, 13, 15^{ab}, 22–27, 31^{ab}, 33–35, 36^{d}–42^{ab}, 43–44, 45^{cd}, 47^{ab}, 47^{d}	
	Adhy.	2	
3, 11, 13, 16, 18–19, 23, 31, 37, 47, 48^{cd}, 53, 55–56, 59, 62, 63^{bcd}, 69	2, 7^{abc}, 14, 33–35, 38–39^{ab}, 41^{a}, 39^{cd}, 48^{ab}, 52^{cd}, 54, 61^{a}, 63^{a}, 64	1, 4–6, 7^{d}–10, 12, 15, 17, 20–22, 24–30, 32, 36, 40, 41^{bcd}, 42–46, 49–52^{ab}, 57–58, 60, 61^{bcd}, 65–68, 70–72	(1) After 2·59, adds : जिह्वोपस्थनिमित्तं हि प्रवृत्तिः सर्वदेहिनाम् । तस्मादमित्रवत्पश्येज्जिह्वोपस्थौ विचक्षणः ॥
	Adhy.	3	
11, 12^{d}, 13, 35^{ab}	2, 12^{abc}, 19^{b}	1, 3–10, 14–19^{a}, 19^{cd}–34, 35^{cd}–43	
	Adhy.	4	
5, 7–9, 14^{ab}, 18, 22, 28, 33^{cd}, 34^{ab}	13, 33^{ab}	1–4, 6, 10–12, 14^{cd}–17, 19–21, 23–27, 29–32, 34^{cd}–42	
	Adhy.	5	
2, 6^{cd}, 7^{d}, 8^{a}, 8^{cd}, 9^{ab}, 10^{cd}	1, 6^{ab}, 8^{b}, 9^{cd}, 10^{ab}	3–5, 7^{abc}, 11–29	
	Adhy.	6	
5, 10, 13, 19^{a}, 32, 30	6, 19^{bcd}, 35^{cd}–36^{ab}	1–4, 7–9, 11–12, 14–18, 20–29, 31, 33–35^{ab}, 36^{cd}–47	
	Adhy.	7	
4, 6^{cd}–7^{ab}, 7^{d}, 8–9, 10^{c}, 11^{a}, 16, 19^{c}, 29	5, 7^{c}, 12^{ab}, 17^{ab}, 17^{d}, 18^{cd}	1–3, 6^{ab}, 10^{ab}, 10^{d}, 11^{bcd}, 12^{cd}–15, 17^{c}, 18^{ab}, 19^{ab}, 19^{d}, 20–28, 30	(2) After 7·4, adds : यथा ज्ञानं लभिष्यति
	Adhy.	8	
5, 7, 12, 13^{ab}	14^{b}	1–4, 6, 8–11, 13^{cd}, 14^{acd}, 15–28	

OLD-JAVANESE BHAGAVADGĪTĀ : TABULAR STATEMENT

Parts Cited	Parts Paraphrased	Parts Omitted	Parts Added
	Adhy.	9	
1, 16, 17^{cd}, 19^{cd}, 27	28^{ab}	2–15, 17^{ab}, 18, 19^{ab}, 20–26, 28^{cd}–34	
	Adhy.	10	
21^{b}, 21^{d}, 22^{b}, 23^{ab}, 23^{d}, 25^{a}, 26, 27^{a}, 27^{cd}, 28^{a}, 28^{d}, 29^{b}, 29^{d}, 30^{a}, 30^{cd}, 31^{b}, 33^{a}, 35^{cd}, 37, 40^{ab}, 42^{ab}	42^{cd}	1–20, 21^{a}, 21^{c}, 22^{a}, 22^{cd}, 23^{c}, 24, 25^{bcd}, 27^{b}, 28^{bc}, 29^{a}, 29^{c}, 30^{b}, 31^{a}, 31^{cd}, 32, 33^{bcd}–35^{ab}, 36, 38–39, 40^{cd}–41	(3) After 10·37, adds : ओषधीनां यवश्चाहं (cf. 101*).
	Adhy.	11	
5, 8, 10, 28–29, 31^{ab}, 32^{ab}, 39^{cd}–40^{ab}, 53, 55	1^{bcd}, 3^{cd}, 6^{abc}, 7, 9, 11^{abc}, 14–15, 26, 27^{cd}, 31^{cd}, 33, 34^{cd}, 35, 46, 49^{d}	1^{a}, 2–3^{ab}, 4, 6^{d}, 11^{d}, 12–13, 16–25, 27^{ab}, 30, 32^{cd}, 34^{ab}, 36–39^{ab}, 40^{cd}–45, 47–49^{abc}, 50–52, 54	(4) After $11{\cdot}29^{a}$, adds (for 29^{bc} ?) : शान्ति च नाशं च यमाभिभूताः । तथैव भस्माङ्ग-मायन्ति लोकाः ॥
	Adhy.	12	
8^{ab}	9^{cd}	1–7, 8^{cd}–9^{ab}, 10–20	
	Adhy.	13	
31^{d}, 32–33	31^{abc}, 34	1–30	
	Adhy.	14	
9, 18, 24–26	5^{ab}, 17, 20	1–4, 5^{cd}–8, 10–16, 19, 21–23, 27	
	Adhy.	15	
		1–20	
	Adhy.	16	
		1–24	
	Adhy.	17	
		1–28	
	Adhy.	18	
66	73	1–65, 67–72, 74–78	

OLD-JAVANESE BHĪṢMAPARVAN : SANSKRIT CITATIONS

Page and Line	Old-Javanese Text	B. O. R. I. Ed.	Calcutta Ed.	Bombay Ed.	Madras Ed.
	भीष्मपर्व	1		1	1
9. 16	कथं युयुधिरे धीराः कुरुपाण्डवसैनिकाः।	± 1^{ab}	± 2^{ab}	± 1^{ab}	± 1^{ab}
17	पार्थिवाश्च महात्मानो नानादेशसमागताः॥	± 1^{cd}	± 2^{cd}	± 1^{cd}	= 1^{cd}
27	यथा युयुधिरे धीराः कुरुपाण्डवसैनिकाः।	± 2^{ab}	± 3^{ab}	± 2^{ab}	± 2^{ab}
28	कुरुक्षेत्रे तपःक्षेत्रे शृणु त्वं पृथिवीपते॥	± 2^{cd}	± 3^{cd}	= 2^{cd}	± 2^{cd}
10. 8	यावत्तपति सूर्यो हि जम्बूद्वीपस्य मण्डलम्।	= 8^{ab}	± 9^{ab}	= 8^{ab}	= 8^{ab}
9	तावदेव समावृत्तं बलं भारतसत्तम॥	± 8^{cd}	± 9^{cd}	± 8^{cd}	± 8^{cd}
		2		2	2
11. 3	ततः पूर्वापरे सैन्ये समीक्ष्य भगवानृषिः।	± 1^{ab}	= 36^{ab}	= 1^{ab}	± 1^{ab}
4	सर्ववेदविदां श्रेष्ठो व्यासः सत्यवतीसुतः॥	= 1^{cd}	= 36^{cd}	= 1^{cd}	= 1^{cd}
15	यदि त्विच्छति संग्रामे दृष्टमेव विशां पते।	± 6^{ab}	± 41^{ab}	± 6^{ab}	± 6^{ab}
16	चक्षुर्ददामि ते दिव्यं युद्धमेतन्निशामय॥	± 6^{cd}	± 41^{cd}	± 6^{cd}	± 6^{cd}
12. 6	यतो धर्मस्ततो जयः	= 14^{d}	= 48^{b}	= 14^{d}	= 14^{d}
		4		3	4
13. 8	किं ते राज्येन दुर्धर्म येन प्राप्तोऽसि किल्बिषम्	± 8^{cd}	± 125^{cd}	± 57^{cd}	± 8^{cd}
9	यशो धर्मं च कीर्तिं च पालयन्सुखमाप्स्यसि।	± 9^{ab}	± 126^{ab}	± 58^{ab}	± 9^{ab}
14	लभन्तां पाण्डवा राज्यं स्वर्गं गच्छन्तु कौरवाः॥	± 9^{cd}	± 126^{cd}	± 58^{cd}	± 9^{cd}
18	कानि लिङ्गानि संग्रामे भवन्ति विजयिष्यताम्।	± 15^{ab}	± 132^{ab}	± 64^{ab}	± 15^{ab}
19	तानि सर्वाणि भगवन्श्रोतुमिच्छामि तत्त्वतः॥	= 15^{cd}	= 132^{cd}	= 64^{cd}	= 15^{cd}
14. 9	एतानि जयमानानां लक्षणानि विशां पते	= 25^{ab}	= 142^{ab}	= 74^{ab}	= $25\frac{1}{2}^{ab}$
	II	7 †		6	6
15. 17	यावद्भूम्यवकाशो हि दृश्यते शशलक्षणः	± 1^{cd}	± 195^{ab}	± 2^{ab}	± 1^{cd}
24	प्रागायता महाराज षडेते वर्षपर्वताः	± 2^{cd}	± 197^{ab}	= 3^{cd}	± 3^{ab}
25	अवरोप्य ह्युभयतः समुद्रे पूर्वपश्चिमे	± 2^{ef}	± 197^{cd}	± 3^{ef}	± 3^{cd}
31	हिमवान्हेमकूटश्च	= 3^{a}	= 198^{a}	= 4^{a}	= 4^{a}
31	निषधो वैडूर्यमयः	—	—	—	—
32	श्वेतो रजतसप्रभः	± 3^{d}	± 198^{d}	± 4^{d}	± 4^{d}
32	संख्या दक्षिणतो भवेत्	—	—	—	—
16. 6	सर्वधातुविनद्धश्च शृङ्गवान्नाम पर्वतः	± 3^{ef}	= 199^{ab}	± 5^{ab}	± 5^{ab}
8	एते षट् पर्वता राजन्सिद्धचारणसेविताः	± 4^{ab}	± 199^{cd}	± 5^{cd}	± 5^{cd}
